Rājagopāla Cakravarti, son of
Gītācārya
Padyaharṣacaritam

PK
3798
R246
P33
1917

Padya Harsha Charitam

॥ श्रीः ॥

Rājagopāla Cakravarti, ed. of Gītā-carya


॥ पद्यहर्षचरितम् ॥

Padyaharṣacaritam

सरलकविसूरिणा

वात्स्यराजगोपालचक्रवर्तिना

विरचितम् ।



श्रीरङ्गस्थ


श्रीवाणीविलास मुद्रायन्त्रालये

संमुद्रितम् ।

१९१७.

[1917]

PK
3798
R246P33
1917



922784

PREFACE.

I am exceedingly pleased to write this introduction for the new book in Sanskrit composed by Pandit Rajagopala Chakravarti, Saralakavi Suri. The work is a metrical rendering of the famous Sri Harshacharita by Bana. The new work gives in a short compass the gist of the story contained in the larger work, and the metrical rendering is so smooth and flowing that it requires an effort to distinguish between some of the original stanzas quoted in this work and the stanzas of our author. Indeed to me, it is a great satisfaction that Mr. Chakravarti has exceeded in some respects his own father Pandit Gitachar who has also composed a Champugrantha and at whose feet I sat as an humble student of Sanskrit more than twenty years ago. Our Pandit is yet young and possesses versatile gifts and I am confident that he will produce many more literary works which will delight the learned world.

Rao Bahadur M. SHAMA RAO, M.A.,


BANGALORE,
19th October, 1916.

Inspector General of Education in Mysore.

॥ श्रीः ॥

॥ पद्यहर्षचरितम् ॥

प्रथम उच्छ्वासः ॥



नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥ १ ॥

हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥ २ ॥

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥ ३ ॥

प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः ।
कोकिला इव जायन्ते वाचालाः कामकारिणः ॥ ४ ॥

सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः शरभा इव ॥ ५ ॥

अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ ६ ॥

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकम् ।
उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः ॥ ७ ॥

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ॥ ८ ॥

किं कवेस्तस्य काव्येन सर्ववृत्तान्तगामिनी ।
कथेव भारती यस्य न प्राप्नोति दिगन्तरम् ॥ ९ ॥

उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ॥ १० ॥

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥ ११ ॥

पदबन्धोज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥ १२ ॥

अविनाशिनमग्राम्यमकरोत्सातवाहनः ।
विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः ॥ १३ ॥

कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला ।
सागरस्य परं पारं कपिसेनेव सेतुना ॥ १४ ॥

सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥ १५ ॥

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥ १६ ॥

समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना ।
हरलीलेव नो कस्य विस्मयाय बृहत्कथा ॥ १७ ॥

आढ्यराजकृतोत्साहैर्हृदयस्थैः स्मृतैरपि ।
जिह्वान्तः कृष्यमाणेव न कवित्वे प्रवर्तते ॥ १८ ॥

तथापि नृपतेर्भक्त्या भीतो निर्वहणाकुलः ।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम् ॥ १९ ॥

सुखप्रबोधललिता सुवर्णघटनोज्ज्वलैः ।
शब्दैराख्यायिका भाति शय्येव प्रतिपादकैः ॥ २० ॥

जयति ज्वलत्प्रतापज्वलनप्रकारकृतजगद्रक्षः ।
सकलप्रणयिमनोरथसिद्धिश्रीपर्वतो हर्षः ॥ २१ ॥

पद्मा पयोधरतटी
मलयजपाटीरपङ्किलोरस्कम् ।
करकलितपाञ्चजन्यं
शरणीकरवाणि शर्मदं विष्णुम् ॥ १ ॥

आसीत्पुरा कदाचि-
त्परमेष्ठी पद्मविष्टरासीनः ।
देवैरिन्द्रप्रमुखै-
र्विद्यागोष्ठीः प्रवर्तयन्ननघाः ॥ २ ॥

त्रैलोक्यमाननीयं
सिषेविरे तं महर्षयः सर्वे ।
केचन ऋचश्च हृद्याः
स्तुतिचतुराः समुदचारयंस्तत्र ॥ ३ ॥

अपठन्यजूंषि केचि-
त्साम च कामं जगुः परे हृष्टाः ।
तेषां मिथस्तदानी-
मभवन्विद्याविसंवादाः ॥ ४ ॥

अत्रान्तरे महात्मा
दुर्वासाः प्रकृतिरोषणो नित्यम् ।
कलहायमान आसी-
त्सह मुनिना मन्दपालेन ॥ ५ ॥

गायन्साम तदानीं
विस्वरमकरोत्कुथान्धितः सदसि ।
सर्वेषु शापभीत्या
मुनिषु प्रतिपन्नमौनेषु ॥ ६ ॥

उन्मुक्तबालभावे
भूषितनवयौवने वयसि ।
कुतुकेन वर्तमाना
पाटलदशनच्छदेन राजन्ती ॥ ७ ॥

दशनज्योत्स्नालोकं
वाङ्मयमिव निर्मलं दिक्षु ।
देवी सरस्वती सा
विकिरन्ती हा जहास निर्भीका ॥ ८ ॥

दृष्ट्वाथ तां हसन्तीं
स मुनिः कोपाकुलो भूत्वा।
जग्राह शापनीरं
शोणितनयनो दशन्दन्तान् ॥ ९ ॥

अत्रान्तरेऽब्जयोने-
रभ्याशं प्राप्य विलसन्ती ।
पियूषफेनपाण्डर-
वसने कल्पद्रुमे वसाना च ॥ १० ॥

सव्यकरे कलयन्ती
कमण्डलुं स्फटिकनिर्मितं रम्यम् ।
उत्क्षिप्य चाक्षमाला-
मन्यकरेणातिकम्पिताङ्गुलिना ॥ ११ ॥

क्रोधोपहत दुरात्म-
न्नज्ञानात्मज्ञ मुनिखेट ।
आः पाप लोकवन्द्यां
वाञ्छसि वागीश्वरीं कथं शप्तुम् ॥ १२ ॥

इत्थं तदा ब्रुवाणा
मूर्तिमवाग्नेश्चतुर्भिरपि वेदैः ।
साकं विहाय पीठीं
सावित्रीद्राक्समुत्तस्थौ ॥ १३ ॥

तत्र विबुधैरनेकैः
मर्षय नाथेति याच्यमानोऽपि ।
रोषावेशदुरीक्षो
दुर्वासाः प्रकृतिपावनां वाणीम् ॥ १४ ॥

प्रविहाय लोकमेनं
मध्यमलोकं प्रयाहि मुग्ध इति ।
शापोदकं तदानीं
मुनिवृषभो हन्त निससर्ज ॥ १५ ॥

प्रतिशापदानसिद्धां
सावित्रीं तां निवार्य वाग्देवी ।
जात्यैव माननीयाः
सततं विप्राः सखीति चोवाच ॥ १६ ॥

अथ तां तथैव शप्तां
दृष्ट्वा वादीत्पितामहो विप्रम् ।
ब्रह्मन्न युक्तमेत-
त्तपो हि शान्त्यै प्रकल्पते यमिनाम् ॥ १७ ॥

न हि कोपकलुषिताधी:
विमृशति कर्तव्यतां ब्रह्मन् ।
आरम्भे गलति तप:
पश्चात्खेदो हि कुपितस्य ॥ १८ ॥

प्रस्फुरति पूर्वमयश:
पश्चादधरश्च पाणिश्च ।
शैलूष इव वृथा त्वं
मुनिवेषं वहसि दुर्बुद्धे ॥ १९ ॥

अज्ञात्वात्मनि दोषं
निरागसं तां किमर्थमसि शप्त: ।
धिगिमां तापसवृत्तिं
शान्तिविहीनां रजोगुणोपेताम् ॥ २० ॥

अभिधाय वाचमित्थं
कमलभवः पुनरुवाच वाग्देवीम् ।
यातिनरः कर्मफलं
वत्से मागा विषादं त्वम् ॥ २१ ॥

एषानुयास्यति त्वां
सावित्री मध्यमं भुवनम् ।
शापस्थितिश्च तावद्
यावत्पुत्राभ्यदर्शनं ते स्यात् ॥ २२ ॥

आकर्ण्य वाचमेना-
मवनतवदना गिरां देवी ।
सख्यासमं तदानीं
गेहमयासीत्प्रभातचन्द्रमुखी ॥ २३ ॥

वार्तामिमां विवस्वान्
मध्यमलोकं जगाम वक्तुमिव ।
शोकालिरिव तमिस्रा
तस्या हृदयं व भुवनमभिपेदे ॥ २४ ॥

इन्दुरपि शोकतप्ता-
मात्र्वासयितुं व शीतलैः किरणैः ।
उदियाय पूर्वभागे
कुवलयसंतोषदायकस्सततम् ॥ २५ ॥

हृदिकिमपि चिन्तयन्तीं
सास्रां वाणीं जगाद सावित्री ।
भुवनोपदेशदक्षे
जिह्वा जिह्वेति ते वक्तुम् ॥ २६ ॥

गुणवति जनेऽपि वामा
दैवगतिर्भवति दुर्लघा ।
बलवति शुभे शुभेवा
फलदे सति किं विचारेण ॥ २७ ॥

कथय कतमं प्रदेशं
वाञ्छसि धरणीतले वस्तुम् ।
सज्जः परिचर्यायै
प्रेयांस्तेयं सखीजनो नित्यम् ॥ २८ ॥

तस्मादर्चय देवं
त्रिजगद्वन्द्यं परात्परं पुरुषम् ।
कुरुते स शापविरतिं
कालेनाल्पीयसैव लोकेशः ॥ २९ ॥

इत्थं तया तदोक्तां
वाचं श्रुत्वा जगाद वाग्देवी ।
प्रियसखि दुःखतरं किं
वियोगमेकं विहाय कान्तस्य ॥ ३० ॥

साकं त्वया चरन्त्या
कापि न मे जायते पीडा ।
अपि तु त्वमेव भूम्यां
वेत्सि स्थानानि योगयोग्यानि ॥ ३१ ॥

अनिमीलितनयनाथो
निशामनैषीत्प्रजागरीभूय ।
अन्येद्युरुदयकाले
कश्चिदगायन्मनोहरं पद्यम् ॥ ३२ ॥

तरलयसि दृशं किमुत्सुका-
मकलुषमानसवासलालिते ।
अवतर कलहंसि वापिकां
पुनरपि यास्यसि पंकजालयम् ॥ २२ ॥

आकर्ण्य पद्ममेतत्
विधिवाहनहंसपालकेनोक्तम् ।
पर्येनुयुक्तेवतदा
परिजनमखिलं परित्यज्य ॥ ३३ ॥

पद्मासने निषण्णं
ब्रह्माणं त्रिः प्रदक्षणीकृत्य ।
सावित्र्यासह सहसा
विधिभुवनान्निर्जगाम भूलोकम् ॥ ३४ ॥

त्वङ्मत्तरङ्गतरलां
विक्रयवीथींव पुण्यपण्यस्य ।
दत्तार्गलामिव महा-
नरकपुरीद्वारदेशस्य ॥ ३५ ॥

उष्णीषिकां व मेरो
रपवर्गस्येव पद्धतिं सरलाम् ।
मन्दाकिनी स्रवन्ती-
मनुसृत्यागान्महानदं शोणम् ॥ ३६ ॥

तस्यैव नातिदूरे
मंजुलकुंजे बबंध गृहबुद्धिम् ।
विश्रान्तानातिचिरा
त्सख्यासाकं तयापचितपुष्पा ॥ ३७ ॥

ध्यायन्ती परमेशं
चकार भुक्तिं फलादिभिस्स्वाद्यैः ।
तत्रैवमेव दिवसान्
ब्रह्माणी सात्यवाहयत्खिन्ना ॥ ३८ ॥

एवं गच्छति काले
द्वेषितमश्रुणोदुदककुभि ।
निर्गत्य कुंजभवना
त्प्रथममपश्यद्रजोनिकरम् ॥ ३९ ॥

तदनु क्रमेण महतीं
युवबहुलां वाहिनीं ददर्शाग्रे ।
तस्मिन्सेनामध्ये
तुरगारूढं मनोज्ञमुखचन्द्रम् ॥ ४० ॥

सिद्धाञ्जनमिव दृष्ट्योः
मनसस्समोहनास्त्रमिव ।
निधिमिव च रूपराशेः
सशरीरं मीनकेतुमिव ॥ ४१ ॥

सन्तं युवानमारा
दष्टादशवर्षदेशीयम् ।
दृष्ट्वा तदीयपर्श्वे
परिणतवयसं ददर्शपुरुषं च ॥ ४२ ॥

सयुवार्पत्तिसकशात्
श्रुत्वा कन्याद्वयस्य वृत्तान्तम् ।
अभ्येत्य तत्समीपं
ताभ्यां जग्राह वन्यमातिथ्यम् ॥ ४३ ॥

तत्रस्थितं द्वितीयं
प्रवयसमाराज्जगाद सावित्री ।
आर्यास्मदीयचेतो
वांछति युष्मत्कथासुधां पातुम् ॥ ४४ ॥

एवं तयानुयुक्तः
प्रश्रययुक्तः प्रवक्तुमारेभे ।
अस्तिप्रशस्तवंशः
त्रिभुवनतिलकस्य जामदग्न्यस्य ॥ ४५ ॥

तद्वंशमौक्तिकमणि-
श्च्यवनसुतो नस्सखा दधीचाख्यः ।
जननी सुकन्यकाख्या
वर्धयदेनं पितुर्गृहेतस्याः ॥ ४६ ॥

मातामहस्तदानीं
कृतविद्यं वीक्ष्य लक्षणोपेतम् ।
प्राहैषीत्पितृमाविधं
सकलकलाकोविदं सुगुणम् ॥ ४७ ॥

जाना तु तत्र भवती
भृत्यं चामुं विकुक्षिनामानम् ।
वयमपि तत्र भवत्यो:
वृत्तान्तं ज्ञातुमिच्छाम: ॥ ४८ ॥

का चेयमत्र भवती
समवायो वा विरोधिवस्तूनाम् ।
बालान्धकारयुक्ता
भास्वन्मूर्तिस्सुधाकरास्या च ॥ ४९ ॥

कलकलहंसध्वाना
नितरामुद्यत्पयोधरातन्वी ।
श्यामा सुधांशुगौरी
हरिणाक्षी पुंडरीकमुखी ॥ ५० ॥

इति पृष्ट्या तदानीं
ज्ञास्यसि कालेन सर्वमिति ।
उक्तं निशम्य कृच्छ्रा
द्वसतिं प्रायाद्धीचेन ॥ ५१ ॥

सा स्मिन्विलीनचित्ता
पूषणि यातेऽस्तभूधरं सन्ध्याम् ।
भक्त्या विधाय तस्थौ
पल्लवशयने गिरां देवी ॥ ५२ ॥

तममुं विचिन्तयन्ती
कथमपि निद्रां समापेदे ।
स्वप्ने निरीक्ष्य तमथो
विरहविषण्णात्यवाहयद्दिवसान् ॥ ५३ ॥

पुनरपि तत्रोपगतं
सावित्री तं विकुक्षिमालोक्य ।
पप्रच्छ जातहर्षा
कुशलोदन्तं दधीचस्य ॥ ५४ ॥

विज्ञाय तत्प्रवृत्तिं
सोऽपि चिरं मंजुलालापैः ।
आभाष्यतां स्वकीयं
देशमयासीन्मुदा समाविष्टः ॥ ५५ ॥

अपरेद्युरेव कल्ये
नातिविदूरे तुरंगमारूढा ।
नूपुररणत्पदाब्जा-
रशना शिंजानमध्यद्युता ॥ ५६ ॥

निर्वोकलघुतरेणा-
प्रपदीने नाथ कंचुकेनेद्धा ।
सुनासदातिलकसमिद्धं
वदनं दृश्यं मुमुद्वहन्ती च ॥ ५७ ॥

बिम्बफलोष्ठी सुदती
कुवलयदलदामदीर्घनयना च ।
जनपरिजनपरिजुष्टा
दृष्टाभून्मालती वाण्या ॥ ५८ ॥

आप्याशु तत्समीपं
गत्वा सर्वं दधीचसंदिष्टम् ।
आख्याय गूढमेषा
पुनरपि वाणीं जगाद साकूतम् ॥ ५९ ॥

जानास्येव समस्तं
माधुर्यं देवि विषयाणाम् ।
पारिप्लवतां मनसः
कुसुमेषोर्दुर्निवारतां चैव ॥ ६० ॥

विज्ञापयामि किं वा
देव्यास्सदृशस्स एव युवरत्नम् ।
देवी प्रमाणमत्रे-
त्यभिधायाभूत्तदा तूष्णीम् ॥ ६१ ॥

वाचामधीश्वरी सा
प्रेम्णा विस्फारितेक्षणाऽवादीत् ।
प्रियसखि किमद्य बहुना
त्वदधीनं जीवितं मेऽद्य ॥ ६२ ॥

इति किल तत्र तयोक्ता
प्रजविन मारुह्य वाजिनं तूर्णम् ।
च्यवनाश्रमं तदानीम्
प्रययौ हृष्टा दधीचमानेतुम् ॥ ६३ ॥

अचिरादथ मालत्या
सोऽपि समागत्य सत्वरं तत्र ।
राकासुधाकरास्या-
मरमयदब्दाधिकं कालम् ॥ ६४ ॥

अथ सापि दैवयोगा-
द्गर्भं धृत्वा गिरां देवी ।
प्रासूत पुत्ररत्नं
समस्तकल्याणलक्षणोपेतम् ॥ ६५ ॥

तस्मै तदैव वाणी
सकलकलाज्ञानदं वरं दत्त्वा ।
तत्रैव तं विहाय
प्रायात्सख्यानिजं लोकम् ॥ ६६ ॥

चिन्ताकुलो दधीचः
प्रजावतीमक्षमालाख्याम् ।
संवर्धनाय सूनोः
विनियुज्यागाद्वनं तपस्तप्तुम् ॥ ६७ ॥

साप्यात्मजेन साकं
सततं वत्साभिधानेन ।
सारस्वतं च बालं
सुतकल्पमवर्धयत्प्रेम्णा ॥ ६८ ॥

अधिगम्य सकलविद्या
बाल्ये सारस्वतस्तूर्णम् ।
भ्रातरि सवयसि वत्से
वाङ्मयमखिलं च संचार्य ॥ ६९ ॥

तं प्रीतिकूटनगरे
कृतदारपरिग्रहं प्रतिष्ठाप्य ।
पितुरन्तिकं जगाहे
विषयविरक्तो व्रती भूत्वा ॥ ७० ॥

तदनु प्रवर्तमाना-
द्वत्साल्कूटस्थपूरुषात्तस्मात् ।
प्रावर्ततातिपुण्यो
विमलो वत्साभिधो वंशः ॥ ७१ ॥

तस्मिन्मुनिजनमान्ये
वंशे वात्स्यायनाः कृतिनः ।
सानुक्रोशाः कवयः
विमत्सराः सरसभाषिणो नित्यम् ॥ ७२ ॥

नित्याग्निहोत्रयुक्ताः
सद्गुणवन्तश्च धर्मिन्तः ।
नित्यं परहितनिरता
द्विजवर्यास्समभवन्मान्याः ॥ ७३ ॥

इत्थं याति च काले
तस्मिन्वंशे कुबेरनामाभूत् ।
तस्यासीत्पाशुपतः
तनयो भ्रातृत्रयोपेतः ॥ ७४ ॥

तस्यासीदर्थपतिः
नाम्ना चैकादशाङ्गजोपेतः ।
अलभत च चित्रभानु-
स्तेषां मध्येऽगजं बाणम् ॥ ७५ ॥

मात्राथ राजदेव्या
हीनं रक्षन्विधाय कृतविद्यम् ।
सोऽदशमीस्तोऽस्तमगा-
दस्य पिता हा चतुर्दशे वर्षे ॥ ७६ ॥

शोकाकुलस्स बाणः
कतिपयादिवसान्निनायैवम् ।
शोके गते विरलतां
विभवसमेतस्थितस्स्वेरम् ॥ ७७ ॥

वयसाऽमुष्य समानाः
आसन्सुहृदस्सहायाश्च ।
सत्यपि समस्तविभवे
निरगादेशान्निरीक्षितुं कुतुकी ॥ ७८ ॥

तां स्तान्समेत्य देशान्
दर्शं दर्शं समस्तदृश्यानि ।
वैपश्चितीं प्रशम्यां
प्राप च जनताहितप्रदां हृद्याम् ॥ ७९ ॥

अथ चागमत्स्वकीयां
जन्मभुवं सर्वसंपदोपेताम् ।
ज्ञात्याप्तमित्रवर्गैः
नन्दितहृदयो वसत्तत्र ॥ ८० ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्यहर्षचरिते
वात्स्यायनवर्णनं नाम
प्रथम उच्छ्वासः समाप्तः ॥



द्वितीय उच्छ्वासः ॥

अतिगंभीरे कूपे
भूप इव जनस्य निरवतारस्य ।
दधति समीहितसिद्धिं
गुणवन्तः पार्थिवा घटकाः ॥ २३ ॥

रागिणि नलिने लक्ष्मीं
दिवसो निदधाति दिनकरप्रभवाम् ।
अनपेक्षितगुणदोषः
परोपकारः सतां व्यसनम् ॥ २४ ॥

अथ तत्र बान्धवानां
चिरदृष्टानां गृहाणि संप्राप्य ।
कुशलं जानन्बाणः
पुण्यवनान्यनुचरन्नासीत् ॥ १ ॥

संफुल्लमल्लिकाभिः
धवलितभुवनः कदाचिदथ कालः ।
ग्रीष्माभिधान आगा-
न्निर्जित्याराद्वसन्तसामन्तम् ॥ २ ॥

अभिनवसमुत्थितोऽयं
प्रतपंश्चंडस्वभावोऽपि ।
निखिलानां कुसुमानां
बंधविमुक्तिं चकार सर्वत्र ॥ ३ ॥

ग्रीष्मे प्रचंडभानौ
भवति ललाटं तपे तस्मिन ।
मत्त इव वाति वाते
दहति च दावे वनानि सर्वत्र ॥ ४ ॥

अपराह्णे च भ्राता
पारशवश्चन्द्रसेनाख्यः ।
अभ्येत्य वाणसविधं
सविनयमेवं व्यजिज्ञपत्तत्र ॥ ५ ॥

राजाधिराजचूडा-
मणिभाभीरञ्जिताङ्घ्रिपद्मस्य ।
चतुरुदधिमेखलायाः
भर्तुर्भूम्या महानुभावस्य ॥ ६ ॥

हर्षाख्यभूपमौलेः
भ्रातुः कृष्णाभिधानस्य ।
वार्ताहरोत्र भवतां
गेहद्वारेस्ति मेखलाभिख्यः ॥ ७ ॥

देवः प्रमाणमत्रे-
त्यभिधायाभूत्ततस्तूष्णीम् ।
शीघ्रं प्रवेशयेति
प्रोक्तस्तमनीनयच्च तत्सविधम् ॥ ८ ॥

तस्माद्गृहीतपत्रः
स्वयमेवावाचयद्वाणः ।
कुशलैरपहरणीयः
सदयं कालातिपात इति ॥ ९ ॥

विज्ञायलेखभावं
पुनरपि संदेशमप्राक्षीत् ।
सोऽपि जगाद स्वामी
तत्र भवन्तं निवेदयत्येवम् ॥ १० ॥

संवर्धनं समं वा
सहवासो वा समानशीलत्वम् ।
तद्वत्सगोत्रता वा
श्रवणं वान्योन्यरागस्य ॥ ११ ॥

अथ वा समानजातिः
स्वस्य परोक्षोपकारकरणं वा ।
एवं सतीर्ष्यता वा
स्नेहनिमित्तान्युशन्ति लोकेस्मिन् ॥ १२ ॥

जानात्येव समग्रां
तत्र भवानर्थशास्त्रमर्यादाम् ।
एकमपि नास्ति मेऽत्र
स्निह्यति चेतस्त्वयि तथापि ॥ १३ ॥

यद्यज्जल्पति पिशुन-
स्तत्तल्लोकस्तथैव गृह्णाति ।
वक्ति च तथैव कामं
सहसा नृपतिः करोतु किं वात्र ॥ १४ ॥

तत्त्वान्वेषिभिरधुना
स्वजनैर्विज्ञाप्यमिदमेव ।
अनुपदमत्र भवद्भी-
राजकुलं नस्खलं कार्यम् ॥ १५ ॥

सेवाविषादिना वा
भगवत्पूजान्तरायभाजा वा ।
न च भवता भवितव्यं
यद्यप्येवं वदन्त्यार्याः ॥ १६ ॥

स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात्समाक्षिपति जीवनमप्यकांडे
कष्टं मनोभव इवेश्वरदूर्विदग्धः ॥ २५ ॥

भवतु तथाप्यन्ये ते
　　स्वामीनश्चान्य एव सुगुणाढ्यः ।
अलमिह बहुना न स्या-
　　त्संगस्तेनाल्पपुण्यानाम् ॥ १७ ॥

इति मेखलकेनोक्तं
　　श्रुत्वा तं चन्द्रसेनमाहूय ।
विश्रान्तसुखिनमेनं
　　कृतकशिपुं कारयेति विससर्ज ॥ १८ ॥

तस्मिन्नेव दिनान्ते
　　कृत्वा संन्धां समेत्य शयनीयम् ।
भूपतिसेवाक्लेशा-
　　न्बहुधा समचिन्तयत्तत्र ॥ १९ ॥

अथ निरधारयदेवं
　　राज्ञामाज्ञा ह्यनुलंघ्या ।
तदवश्यं गन्तव्यं
　　भगवान्कुशलं करोतीति ॥ २० ॥

अथ च परेद्यविकल्पे
स्नातः पूजां विधाय देवस्य ।
कृतगमनमंगलोऽयं
नत्वा कुलदेवताश्चापि ॥ २१ ॥

अभिनन्दितश्च मित्रैः
स्वस्रा जनकस्य मालत्या ।
शुभदे तत्र मुहूर्ते
लघु निरगात्प्रीतिकूटात्स्वात् ॥ २२ ॥

प्रथमेहि चंडिकाख्यं
घातुकनानामृगाळिसंयुक्तम् ।
समतिक्रम्यारण्यं
ग्राममगान्मल्लकूटाख्यम् ॥ २३ ॥

तत्र जगत्पतिनाम्ना
सुहृदा सम्मानितस्तस्थौ ।
तीर्त्वा परेहि गंगां
ग्राममगाद्यष्टिगृहकाख्यम् ॥ २४ ॥

तस्मादुपमणितारं
स्कंधावारं जगाम कुतुकेन ।
तत्र कृतसन्निवेशं
प्राप्य स्नानादिकं चक्रे ॥ २५ ॥

विश्रम्य यामशेषे
दिवसे निर्गत्य दूतेन ।
पश्यन्पुरस्य शोभां
तृणाय मेने सुरादिलोकांस्तान् ॥ २६ ॥

सामन्तभूमिपालै-
रन्यैर्भूपैर्जितैश्चापि ।
आसेव्यमानमनिशं
चतुरंगबलेन रम्यं च ॥ २७ ॥

पाराशरिभिर्जैनै:
पाशुपतैरार्हतैश्चापि ।
एकान्तसंनिविष्टै:
राजद्वारं स्वलंकृतं प्राप ॥ २८ ॥

चिन्तयति तत्र तस्मिन
जनतानिर्माणकौशलं धातुः ।
पुरतः प्रविश्य दूत-
स्तूर्णं दौवारिकेण पुनरागात् ॥ २९ ॥

वीध्रककंचुकवपुषं
पाण्डुरमुष्णीषमुद्वहन्तं च ।
करकलितहेमयष्टिं
ददर्श तं पारियात्रनामानम् ॥ ३० ॥

अथ तेन नीयमानः
सुलक्षणैर्विविधदेशसंभूतैः ।
भूपालम्पृहणीयै-
र्हेषितवाचालिकेशैश्च ॥ ३१ ॥

विविधपरिकर्मयुक्तैः
पश्चान्नद्धैकचरणैश्च ।
श्रेणीकृतैस्तुरंगै-
रारचितां मन्दुरां समद्राक्षीत् ॥ ३२ ॥

हृष्टः पुरो जगाहे
हस्तिपतेर्बन्धनस्थानम् ।
तत्र स्थितं महान्तं
सशरीरं मेघराशिमिव ॥ ३३ ॥

दर्पेणेव दलन्तं
नागेन्द्रं दर्पशातमालोक्य ।
निर्माणेऽस्य विधातु-
र्ध्रुवमचलाः साधनीभूताः ॥ ३४ ॥

नो चेदीदृशकरिणं
स्रष्टुं प्रभवेत्कथं धाता ।
इति मनसि चिन्तयन्तं
बाणं दौवारिकः प्राह ॥ ३५ ॥

मिथ्यैवालिखितां मनोरथशतैर्निःशेषनष्टां श्रिया
चिन्तासाधनकल्पनाकुलधियां भूयो वने विद्विषाम् ।
आयातः कथमप्ययं स्मृतिपथं शून्यीभवच्चेतसां
नागेन्द्रःसहते न मानसगतानाशागजेन्द्रानपि ॥

श्रुत्वा तदीयवाचं
तुष्टस्तेनोपदिष्टमार्गेण ।
कक्ष्यात्रयं नृपौघैः
सान्द्रं तत्समतिचक्राम ॥ ३६ ॥

कक्ष्यान्तरे चतुर्थे
स्वामीनं मण्डपाजिरे रम्ये ।
आसेव्यमानमारा-
दिष्टैः शिष्टैश्च महनीयैः ॥ ३७ ॥

शस्त्रिव्रातपरीतं
सिंहस्कन्धं प्रसन्नमुखचन्द्रम् ।
आजानुलम्बि बाहुं
पद्माक्षं सर्वलक्षणोपेतम् ॥ ३८ ॥

हारेण राजमानं
श्रीवाण्योः स्थलविभाजकेनेव ।
नानाविद्यानिलयं
रसिकवतंसं दयार्द्रचित्तं च ॥ ३९ ॥

रांजकसर्गसमाप्ते-
रवभृथदिवसमिव राजन्तम् ।
कौतुकनिलयं पुरतः
त्र्यलोकयच्चक्रवर्तिनं हर्षम् ॥ ४० ॥

दृष्ट्वा परं प्रहृष्ट-
श्चिन्तां चक्रे मनस्येवम् ।
नास्य हरेरिव चित्रं
बाल्याचरितानि वृषविरोधीनि ॥ ४१ ॥

अस्मिन्नाजनि भुवने
भुजगानां द्विजगुरुद्वेषः ।
विग्रहविधिः पदानां
पादच्छेदश्च वृत्तानाम् ॥ ४२ ॥

उपपीडनमिक्षूणां
कुकवेः काव्ये यतेर्भङ्गः ।
सततं प्रत्यधिकरणं
वाक्यज्ञानां विवादश्च ॥ ४३ ॥

दानग्रहणे वादः
परम्परं मधुपनिकरस्य ।
वैद्ये रोगविचारः
प्रजासु नासीत्किमपि तद्राज्ये ॥ ४४ ॥

अभ्येत्य राजसविधं
स्वस्तीत्युक्त्वाशिषं चक्रे ।
हास्तिपकस्तत्र तदा
ममगायन्मधुरमपरवक्त्रमिदम् ॥ ४५ ॥

करिकलभ विमुञ्च लोलतां
चरविनयव्रतमाननः ।
मृगपतिनखकोटिभङ्गुरो
गुरुरुपरि क्षमते न तेऽङ्कुशः ॥ २८ ॥

आकर्ण्य पद्यमेत-
द्राजापश्यत्पुरःस्थितं बाणम् ।
सद्यो मालवसूनुं
जगाद चायं महाभुजंग इति ॥ ४६ ॥

मूकेऽथ राजलोके
बाणः श्रुत्वा क्षणं तूष्णीम् ।
स्थित्वावादीद्भूपं
राजन्नज्ञाततत्त्व इव ॥ ४७ ॥

अज्ञातलोकवृत्तो
नेय इवाश्रद्दधान इव ।
आज्ञापयसि किमेवं
नार्हसि मामन्यथा मन्तुम् ॥ ४८ ॥

अहमस्मि वत्सवंश्यः
पठितः साङ्गो मया वेदः ।
विश्रुतशास्त्रश्चाहं
का मयि राजन्भुजंगता दृष्टा ॥ ४९ ॥

अद्य विभो किं बहुना
ज्ञास्यसि कालेन सर्वथा तत्त्वम् ।
इत्यभिधाय तदानीं
तस्थौ जोषं महाधीरः ॥ ५० ॥

भूपतिरप्यस्माभिः
श्रुतमेवं द्विजवरेति संभाष्य ।
स्निग्धं च वीक्ष्य भाना-
वस्तमितेऽन्तःपुरं प्रायात् ॥ ५१ ॥

स च बाणः स्वावासं
समेत्य सन्ध्याविधिं चक्रे ।
बहुधा विचिन्त्य तस्मा-
त्कटकादपरेऽह्नि निर्ययौ कल्ये ॥ ५२ ॥

सुहृदां च बान्धवानां
भवनान्येत्यावसत्तावत् ।
यावत्पुनरपि हर्षः
स्वयमेव समाह्वयेद्भक्त्या ॥ ५३ ॥

आकारितोऽथ बाणः
हर्षप्रसादमभ्येत्य ।
प्रीतेन नृपतिनायं
नितरां संमानितः सुखं तस्थौ ॥ ५४ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्यहर्षचरिते राजदर्शनं नाम
द्वितीय उच्छ्वासः समाप्तः ॥

तृतीय उच्छ्वासः ॥

निजवर्षाहितस्नेहा
बहुभक्तजनान्विताः ।
सुकाला इव जायन्ते
प्रजापुण्येन भूभुजः ॥ २९ ॥

भास्वरभास्वति तस्मिन्
कोमलकमलेऽथ शुभ्रशीतांशौ ।
बाणः शरदारम्भे
राज्ञः सविधात्स्वबन्धवान्द्रष्टुम् ॥ १ ॥

वात्स्यायनैर्द्विजेन्द्रैः
दीप्रं स्वं प्रीतिकूटमगात् ।
संमानितं नृपेण
प्रेक्ष्याप्ता मुमुदिरे तत्र ॥ २ ॥

कांश्चिदभिवन्दमानः
कैश्चिद्भक्त्याभिवन्द्यमानश्च ।
बहुबन्धुमध्यवर्ती
कविकुलतिलकः परं मुमुदे ॥ ३ ॥

अथ तत्र गुरुजनाना-
मन्तिकमभ्येत्य तान्समभ्यर्च्य ।
कुतुकात्तदीयकुशलं
सविनयमेवं समप्राक्षीत् ॥ ४ ॥

अप्रत्यूहा क्रियते
सततं किं क्रातवी क्रिया सम्यक् ।
शास्त्राभ्यासः कच्चि-
त्क्रियते सर्वैर्यथापूर्वम् ॥ ५ ॥

इत्थं पर्यनुयुक्ताः
प्रोचुस्ते तं परं हृष्टाः ।
त्वयि तिष्ठति राजसखे
कृतकृत्याः सुखिन एव वयम् ॥ ६ ॥

इत्यादिभिरालापैः
तैस्तैः सुचिरं प्रमोदितस्वान्तः ।
माध्यान्हिकादि कृत्वा
बन्धुजनैः परिवृतस्तस्थौ ॥ ७ ॥

अत्रान्तरे सुदृष्टि-
र्धृत्वा वेषं विनीतमार्यं च ।
पुस्तकवाचक आरा-
देत्यासन्द्यां च निषसाद ॥ ८ ॥

तत्रापनीतसूत्रं
पुस्तकमग्रे निधाय कुतुकेन ।
पश्चादुपस्थिताभ्यां
मधुकरपारावताभ्यां च ॥ ९ ॥

दत्ते स्थाने तस्मा-
दन्तरपत्रं समुत्क्षिप्य ।
गीत्या पवमानोक्तम्
पठति पुराणं तदा तस्मिन् ॥ १० ॥

नात्यन्तदूरवर्ती
सूची बाणाभिधो वन्दी ।
गीतध्वनिमनुकुर्व-
न्नार्यायुगलं पपाठेदम् ॥ ११ ॥

तदपि मुनिगीतमतिपृथु
तदपि जगद्व्यापि पावनं तदपि ।
हर्षचरितादभिन्नं
प्रतिभाति हि मे पुराणमिदम् ॥ ३० ॥

वंशानुचरितविवादि
स्फुटकरणं भरतमार्गभजनगुरु ।
श्रीकण्ठविनिर्यातं
गीतमिदं हर्षराज्यमिव ॥ ३१ ॥

तच्छ्रुत्वा चत्वारः
विस्मितहृदयाः पितृव्यपुत्रास्ते ।
पश्यन्तश्चान्योन्यं
गणपत्याद्याः स्थितास्तूष्णीम् ॥ १२ ॥

तत्र श्यामलनामा
बाणप्रेयान्बभाणेत्थम् ।
द्विजराजोऽपि महात्मा
गुरुदारपरिग्रहं चक्रे ॥ १३ ॥

नहुषः परस्य रमणी-
मिच्छन्प्रायाद्भुजंगतां तूर्णम् ।
सुतपस्यन्पुरुकुत्सो
मेकलकन्यामहो चकमे ॥ १४ ॥

ऊढ्वा ब्राह्मणतनयां
हन्त ययातिः पपात राजापि ।
संवरणः प्रियसुहृदः
कन्यायामाप विक्लवताम् ॥ १५ ॥

गोब्राह्मणादिपीडां
कुर्वन्निधनं स कार्तवीर्योऽगात् ।
राजत्वमपकलङ्कं
भुवने नास्तीह हर्षतोऽन्यत्र ॥ १६ ॥

श्रूयन्ते चाम्य मदा
विविधान्याश्चर्यकार्याणि ।
लोकेशेनाप्यमुना
शेषोपरि च श्रमा निहिता ॥ १७ ॥

अमुनापि सिन्धुराजं
प्रमथ्य लक्ष्मीः कृतायत्ता ।
इत्येवमादयोऽन्ये
प्रोच्यन्ते ते महासमारम्भाः ॥ १८ ॥

तस्मान्महात्मनोऽस्य
श्रोतुं चरितं समग्रमिच्छामः ।
आचष्टामत्र भवा-
नित्युक्त्वा सोऽथ विरराम ॥ १९ ॥

बाणः सहासमवद-
द्युक्त्यनुरूपं त्वया प्रोक्तम् ।
वर्णयितुं तच्चरितं
वाग्देवी नैव शक्नोति ॥ २० ॥

क्वाहं परिमितवचनः
तच्चरितं वर्णयेय निःसीमम् ।
अथवा भवदुपरोधा-
द्यत्किंचिच्छ्वोऽभिधास्यामि ॥ २१ ॥

इत्युक्त्वा नातिचिरा-
द्वाणः सान्ध्याय शोणमगात् ।
प्रत्यागत्यानैषी-
द्वृणपतिभवने निशीथिनीं मुदितः ॥ २२ ॥

रात्रेस्तुरीययामे
प्रतिबुद्धस्तत्क्षणं वन्दी ।
श्लोकद्वयं मनोज्ञं
तारमगायत्स्वरेण मधुरेण ॥ २३ ॥

पश्चादङ्गिं प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठोमुखमुरसि सटाधूलिधूम्राविधूय ।
घासग्रासाभिलाषादनवरतचलप्रोथतुण्डस्तुरंगो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण

कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कन्थरामातिरश्चीं
लोलेनाहन्यमानं तुहिनकणमुचा चञ्चता केसरेण ।
निद्राकण्डूकषायं कषति निबडितश्रोत्रशुक्तिस्तुरंग-
स्त्वङ्नत्पक्ष्माग्रलग्नप्रतनु बुसकणं कोणमक्ष्णः खुरेण ॥

श्रुत्वा विहाय निद्रा-
मुदिते भानावुपास्य सन्ध्यां च ।
बाणः स्वबान्धवानां
चरितं हर्षस्य वक्तुमारेभे ॥ २४ ॥

अस्ति समस्तैर्विभवै-
र्भुवमवतीर्णः सुरेन्द्रलोक इव ।
पुण्यकृतामधिवासः
सततासंकीर्णवर्णविन्यासः ॥ २५ ॥

श्यामः सस्यसमूहैः
शालीयैः सर्वतः सान्द्रः ।
वापीकूपतटाकैः
पुण्यैस्तैस्तैर्नदैर्युक्तः ॥ २६ ॥

महिषारूढैः सततं
गायद्गोपैः समृद्धविपिनश्च ।
नानाफलकुसुमेद्धः
श्रीकण्ठो नाम जनपदो रम्यः ॥ २७ ॥

एवंविधे च तस्मि-
न्प्रवरः स्थाण्वीश्वराभिख्यः ।
सुतपो वनमिति ऋषिभिः
कन्दर्पपुरीति वेश्याभिः ॥ २८ ॥

संयमिनीत्यरिनिवहै-
रर्थिभिरखिलैश्च कामधेनुरिति ।
निखिलैर्गायनवर्गैः
संगीतकलाविलासभूमिरिति ॥ २९ ॥

नानाविद्या सरितां
सिन्धुरिति समस्तविद्वद्भिः ।
ज्ञातो बहुभिर्बहुधा
राजति निःसीमविभवेन ॥ ३० ॥

तत्र च गृह्णन्साक्षा-
दिन्द्र इवानेकवर्णयुक्चापम् ।
सोम इव कलाग्रहणे
वेद इवाकृतिमालापे ॥ ३१ ॥

शत्रुघ्नः समरमुखे
मनसि विशालो गुरुर्वचसि ।
जनकस्तपसि महात्मा
सदसि बुधश्चार्जुनो यशसि ॥ ३२ ॥

भीष्मश्चापकलायां
रहसि सुमन्त्रश्च पालने दक्षः ।
राजाधिराजवन्द्यो
राजासीत्पुष्पभूतिरिति ॥ ३३ ॥

शासति राजनि तस्मि-
न्द्विजगुरुभक्त्या च देवभक्त्या च ।
सर्वाः प्रजास्तदानीं
भर्तेव सदास्तिका आसन् ॥ ३४ ॥

भूमीपतिः कदाचि-
त्सकलकलापारगं विप्रम् ।
दक्षिणदेशनिवासं
चाराच्छुश्राव भैरवाचार्यम् ॥ ३५ ॥

तद्दर्शनाय काङ्क्षा-
प्यथ जाता भूपतेर्महती ।
एवं स्थिते कदाचि-
द्यतिरागाद्भैरवाभिख्यः ॥ ३६ ॥

राजाप्यानीयान्तः
समुचितमभ्यर्च्य तं समप्राक्षीत् ।
अयि भिक्षोऽद्य महात्मा
कुत्रास्ते भैरवार्य इति ॥ ३७ ॥

सोऽपि जगादाचार्यो
राजन्नास्ते सरस्वतीतीरे ।
आशीर्वचसा भगवा-
नर्चयति त्वां महाभागम् ॥ ३८ ॥

इति राजतानि तस्मै
रत्नसमिद्धानि पुण्डरीकाणि ।
पञ्च ददौ यतिवृषभः
प्रीत्याऽऽचार्यप्रदत्तानि ॥ ३९ ॥

तान्यादाय महीपः
श्वोऽहं द्रष्टास्मि भैरवाचार्यम् ।
इत्युक्त्वा मस्करिणं
सादरमभ्यर्च्य विससर्ज ॥ ४० ॥

अन्येद्युरेव राजा
कतिपयभूपात्मजैः साकम् ।
द्रष्टुं बुधवरमनघं
प्रययौ तस्यान्तिकं तूर्णम् ॥ ४१ ॥

तत्र स्थितं द्विजेन्द्रं
तीर्थं तथ्यस्य धाम सत्यस्य ।
सौजन्यस्य समाजं
प्रासादं सुप्रसादस्य ॥ ४२ ॥

पञ्चाधिकपञ्चाश-
द्वर्षे कृतिनं ददर्शाग्रे ।
आचार्योऽपि महीशं
दृष्ट्वा स्वस्तीति च प्राह ॥ ४३ ॥

अभिवाद्य तं महीपः
परिजननीते पटासने रम्ये ।
आचार्यानुज्ञातः
तस्थौ भूपालपुत्रैस्तैः ॥ ४४ ॥

आसीने नरपाले
गुरुशिवभट्टारकच्छात्रः ।
सोऽयं भैरवाविबुधः
प्राशंसद्भूपतिं बहुधा ॥ ४५ ॥

राजा विविधकथाभिः
सुचिरं स्थित्वा गृहं प्रायात् ।
दिवसेऽन्यस्मिन्नृपतिं
द्रष्टुमगाद्भैरवाचार्यः ॥ ४६ ॥

भूपस्स्वकीयविभवं
सर्वं तस्मै निवेदयामास ।
श्रुत्वा विहस्य विबुधः
क्व वयं वनवर्धिताः क्व चैश्वर्यम् ॥ ४७ ॥

निखिलाया अपि भूतेः
भवादृशा एव भाजनं सततम् ।
इत्यभिधाय स्थित्वा
कंचित्कालं ततोऽयासीत् ॥ ४८ ॥

तत्प्रहितश्च परित्रा-
ड्राजानं तं कदाचिदभ्येत्य ।
आशीर्वादं कृत्वा
प्रोवाचेत्थं प्रजाधीशम् ॥ ४९ ॥

शिष्योऽस्माकं राज-
न्पातालस्वामिनामास्ति ।
तेनाट्टहासनामा
मुषितोऽभूद्ब्रह्मराक्षसात्खड्गः ॥ ५० ॥

इत्यभिधाय तदानीं
कर्पटकोशान्तराच्छुभ्रम् ।
इन्द्रेणापि दुरापं
खड्गं सहसा समाकृष्य ॥ ५१ ॥

भूपालाय प्रददौ
सोऽपि गृहीत्वा परं मुमुदे ।
हृष्टो यतिश्च राज-
न्भवते स्वस्तीत्यगात्तस्मात् ॥ ५२ ॥

आचार्यश्च कदाचि-
द्रहसि समीक्ष्याब्रवीद्भूपम् ।
पूर्वं मया श्मशाने
मनोर्महाकालहृदयस्य ॥ ५३ ॥

कृष्णस्रगम्बराद्यै:
जपकोटिश्चिन्तिता यथाकल्पम् ।
तस्य जपस्य तु सिद्धि:
वेताळवशीकृति: कथिता ॥ ५४ ॥

असहायैस्तु दुरापा-
त्वं चालं कर्मणे तस्मै ।
त्वयि च प्रगृहीतभरे
त्रयः सहायाः परे सन्ति ॥ ५५ ॥

एकष्टीटिभनामा
यतिरास्ते बालमित्रं मे ।
पातालस्वाम्यपरः
शिष्योऽन्यः कर्णतालनामास्ति ॥ ५६ ॥

इत्युक्तोऽथ नृपेन्द्रः
सादरमङ्गीचकार तद्वाणीम् ।
सोऽप्यकरोत्सङ्केतं
कृष्णे पक्षे चतुर्दश्याम् ॥ ५७ ॥

रात्रावुपश्मशानं
भवता शस्त्रद्वितीयेन ।
द्रष्टव्या वयमिति च
प्रोच्य ययौ भैरवाचार्यः ॥ ५८ ॥

राजा ततस्तदीयं
नियमितसमये निवेशमभ्येत्य ।
विधिना शैवेन तदा
दीक्षित आसीदसिं करे कृत्वा ॥ ५९ ॥

निश्शब्देऽथ निशीथे
राजा प्रायात्तमुद्देशम् ।
तेऽपि त्वयोऽनु जग्मू
रणरणकं विकटवेषमाधाय ॥ ६० ॥

भूपस्तानप्राक्षी-
त्तेऽपि स्वं स्वं न्यवेदयन्नाम ।
साकं तैरेव मुदा
साधनभूमिं जगाम निःशब्दाम् ॥ ६१ ॥

तत्र सितभस्मलिखिते
मण्डलमध्ये समीपस्थे ।
रक्तस्रगम्बराद्यैः
जुष्टस्योत्तानशयितस्य ॥ ६२ ॥

उरसि शवस्य स्थित्वा
तन्मुखकुहरे कृताग्निकार्यं च ।
कृष्णतिलाहुतिसक्तं
कृष्णोष्णीषं च कृष्णवस्त्रं च ॥ ६३ ॥

उपसृत्य भैरवार्यं
नत्वाऽवाच्यां स्थितः ककुभि ।
पातालाख्यः प्राच्यां
प्राचेतस्यां यतिश्चासीत् ॥ ६४ ॥

अपरश्च कर्णतालः
कौबेरीं तां दिशं प्राप ।
एवं स्थितेऽर्धरात्रा-
त्परतस्तन्मण्डलोदीच्याम् ॥ ६५ ॥

भूमिर्व्यदीर्यता स्याः
उत्तस्थौ भीषणः पुरुषः ।
प्राहाट्टहासयुक्तः
श्रीकण्ठः क्षेत्रपालको नागः ॥ ६६ ॥

का ते बुद्धिरियं भो
मह्यमदत्वा बलिं किमाचरसि ।
इत्यभिधाय सकोपं
तानभिदुद्राव टीटिभप्रमुखान् ॥ ६७ ॥

भूपोऽपि बाहुयुद्धे
भूमौ तं पातयामास ।
अवलोक्य यज्ञसूत्रं
द्विज इति तत्याज तं महानागम् ॥ ६८ ॥

तदनन्तरं ज्वलन्तीं
पद्माक्षीं पद्महस्तां च ।
पद्मास्यां पद्मपदां
कामपि वनितां विलोक्य पप्रच्छ ॥ ६९ ॥

सापि जगाद रमाहं
याचस्व वरं ददामि भूपेति ।
स्वार्थविमुखो ययाचे
पद्मां राजा द्विजन्मनस्सिद्धिं ॥ ७० ॥

उक्त्वा तथेति लक्ष्मी:
राजन्हर्षाभिधः पुत्रः ।
भुवनत्रयविजिगीषु:
भवितेत्यभिधाय चान्तरभूत् ॥ ७१ ॥

मुमुदे भूपवरेण्यः
सोऽपि तदा भैरवाचार्यः ।
नानाभूषा जुष्टो
विद्याधरतामवापाशु ॥ ७२ ॥

स तदा नृपं प्रहृष्टः
स्तुत्वा प्रायादभीप्सितं स्थानम् ।
नागोऽपि नृपनिदेशा-
दविशद्भूयस्तदेव भूविवरम् ॥ ७३ ॥

राजा क्षपावसाने
गृह्णन्त्रीन्टीटिभप्रमुखान् ।
नगरं प्रविश्य तेषा-
मकारयद्भोजनादिकं तत्र ॥ ७४ ॥

कतिपयदिवसापगमे
यतिरटवीं प्राप वार्यमाणोऽपि ।
पातालकर्णतालौ
सुखमास्तां पुष्पभूतिना तत्र ॥ ७५ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्महर्षचरिते
तृतीय उच्छ्वासः ॥



चतुर्थ उच्छ्वासः ॥



योगं स्वप्नेति नेच्छन्ति
कुर्वते न परिग्रहम् ।
महान्तो नाममात्रेण
भवन्ति पतयो भुवः ॥ ३५ ॥

सकलमहीभृत्कंप-
कृदुत्पद्यत एक एव नृपवंशे ।
विपुलेऽपि पृथुप्रतिमो
दन्त इव गणाधिपस्य मुखे ॥ ३६ ॥

तस्माच्च पुष्पभूतेः
वंशः शुक्लेन्दुवत्प्रवृद्धोऽभूत् ।
बहवस्तत्र च भूपा
विश्वख्याता अजायन्त ॥ १ ॥

एवं गच्छति काले
जगति प्रथितः प्रतापशील इति ।
राजाधिराज आसी-
त्कविकुलवन्द्यः प्रभाकराभिख्यः ॥ २ ॥

तस्मिन्शासति भुवनं
दत्ता कलये जलाञ्जलिर्लोकैः ।
अङ्कुरितं यूपवरैः
पृथ्व्यां सर्वत्र कृतयुगेनेव ॥ ३ ॥

लक्ष्मीरिव लोकगुरोः
हिमगिरितनयेव चन्द्रचूडस्य ।
तस्य नृपेन्द्रस्य सती
यशोवतीनाम लोकवन्द्यासीत् ॥ ४ ॥

अयमप्यपत्यहेतोः
प्राध्वं प्रयतेन चेतसा नित्यम् ।
आदित्यहृदयमन्त्रम्
भक्त्या सन्ध्यात्रये जपन्नासीत् ॥ ५ ॥

एवं स्थिते कदाचि-
ज्जायासहितः स्वपन्भूपः ।
अश्रुणोत्कल्ये देव्या
वाचं त्रायस्व मामिति प्रसृताम् ॥ ६ ॥

श्रुत्वा नृपस्तदानीं
देव्या मुखतोऽपि तादृशीं वाचम् ।
उत्थाय खड्गहस्ता-
स्सकलदिशास्वप्यवीक्ष्य किंचिदपि ॥ ७ ॥

भयकारणमप्राक्षी-
देवीमेवाथ वेपमानाङ्गीम् ।
सेति जगाद महीपं
नाथ मया कोऽपि वीक्षितः स्वप्नः ॥ ८ ॥

तेजोमयौ कुमारौ
सालंकारौ च रक्तसिक्ताङ्गौ ।
विधुमूर्त्येव स्थितया
रविबिम्बाद्बालया विनिर्गत्य ॥ ९ ॥

भुवमवतीर्य च कुक्षिं
विलपन्त्या मे विदार्यखड्गेन ।
यावत्प्रवेष्टुमेता-
वुद्युक्तौ तावदेव बुद्धास्मि ॥ १० ॥

प्रत्यूषवाद्यघोषैः
साकं देव्या वचश्च शुश्राव ।
पुरुषश्च मन्दुरायां
अपठद्वक्त्रापवक्त्रे द्वे ॥ ११ ॥

निधिस्तरुविकारेण
सन्मणिस्फुरता धाम्ना ।
शुभागमो निमित्तेन
स्पष्टमाख्यायते लोके ॥ ३७ ॥

अरुण इव पुरस्सरो रविं
पवन इव वाति जवो जलागमः ।
शुभमशुभमथापि वा नृणां
कथयति पूर्वनिदर्शनोदयः ॥ ३८ ॥

श्रुत्वा प्राह नृपालो
देवि समृद्धाः सदाशिषोऽस्माकम् ।
नातिचिराद्भविता ते
गुणवदपत्यत्रयस्य संप्राप्तिः ॥ १२ ॥

याति ततः कालकणे
सुषुवे सा राज्यवर्धनं प्रथमम् ।
पुनरपि समयेऽन्यस्मि-
न्हृदये गर्भे च हर्षमेव दधे ॥ १३ ॥

गर्भे ततः कठोरे
द्वादश्यां ज्येष्ठमासि बहुलदले ।
नक्तं प्रथमे यामे
हर्षं प्रासूत लोकहर्षेण ॥ १४ ॥

धात्री सुता सुयात्रा
ससंभ्रमं भूपपादमभ्येत्य ।
निशमय्य पुत्रजननं
जहार सा पूर्णपात्रमपि ॥ १५ ॥

तस्मिन्नेव च काले
गणकोऽप्यागत्य भोजको नाम ।
एवंविधे सुलग्ने
मान्धाता प्राप भूपतिर्जन्म ॥ १६ ॥

ईदृशलग्ने जाताः
सर्वे ते चक्रवर्तितां प्रापुः ।
तस्मादयमपि भवतां
सूनुः सप्तार्णवीपतिर्भविता ॥ १७ ॥

एवं जगाद तस्मि-
न्साकं नानाविधैर्वाद्यैः ।
ननृतुः प्रजाः प्रमोदा-
न्नरपतिपुत्रोत्सवे जगति ॥ १८ ॥

महता महेन साकं
ववृधे शुक्लेन्दुरिव बालः ।
गतवति षष्ठे वर्षे
पुनरपि देवी दधौ गर्भम् ॥ १९ ॥

पूर्णे क्रमेण गर्भे
शस्ते लग्ने शुभग्रहैर्युक्ते ।
शर्वाणीमिव मेना
राज्ञी प्रासूत दुहितरं मान्याम् ॥ २० ॥

तदनु कदाचिद्देव्याः
भ्राता स्वस्यात्मजन्मानम् ।
भूपतिसूनोश्चक्रे
सुहृदं भंडिप्रथाभाजम् ॥ २१ ॥

तावपि राजकुमारौ
राघवरामानुजाविवान्योन्यम् ।
सुप्रीतौ सुख्याता-
वास्तां राजाधिराजनतपादौ ॥ २२ ॥

एवं प्रयाति काले
भूपालो मालवेन्द्रसुकुमारौ ।
सुहृदौ तयोर्विंतने
माधवसुकुमारदत्तनामानौ ॥ २३ ॥

राज्यश्रीरपि तनया-
ववृधे ताभ्यां सहाप्रजाताभ्याम् ।
तां परिणेतुं भूपा
दूतमुखेभ्यो ययाचिरे भूपम् ॥ २४ ॥

राजा प्रभाकरोऽयं
प्रासादबहिस्स्थितेन पुरुषेण ।
स्वप्रस्तावायाता-
मश्रुणो दार्यामिमां गीताम् ॥ २५ ॥

उद्वेगमहावर्ते
पातयति पयोधरोन्नमनकाले ।
सरिदिव तटमनुवर्षं
विवर्धमाना सुता पितरम् ॥ २६ ॥

श्रुत्वा तां मनुजेन्द्रो
राज्ञीं पार्श्वस्थितां समालोक्य ।
कान्ते प्राप्तवयस्का
तनया मे श्लाघ्यगुणवन्द्या ॥ २६ ॥

चिन्ता हन्त ममापि
प्रौढां दृष्ट्वा सुतां जाता ।
किमथ विचित्रमसारे
संसारे धनिकरिक्तसमदृष्टौ ॥ २७ ॥

यदपत्यत्वेऽपि समे
जातायां दुहितरि प्रदूयन्ते ।
हा तत्समिह लोके
न हि न हि कुत्रापि दृश्यते दुःखम् ॥ २८ ॥

किं चिन्तया वराक्या
गृहिभिर्मोहादेव लोकवृत्तिरियम् ।
तदवन्तिवर्मसूनुः
पितुरन्यूनो गुणैः प्रथते ॥ २९ ॥

सत्स्वपि गुणेषु बहुशः
सन्तः सदृशमेव शंसन्ति ।
तद्यद्यनुमनुषे त्वं
तस्मै कन्यां प्रदास्यामि ॥ ३० ॥

एवं वदति महीन्द्रे
देवी श्रुत्वाऽतिदुःखार्ता ।
माता धात्रीकल्पा
जनकस्तु परं प्रभुः प्रदानादौ ॥ ३१ ॥

पुत्रस्नेहादधिकः
पुत्रीस्नेहः प्रवर्तते लोके ।
तन्न यथा नः खेदः
प्रभवेद्भवता तथा कार्यम् ॥ ३२ ॥

इत्थं जगाद देवी
तदनु तनूजां नृपस्समाहूय ।
विदितार्थां तामकरो-
न्निश्चयमकरोच्च परिणये तस्याः ॥ ३३ ॥

दूते यातेऽवन्तीं
भूपालः शिल्पिवर्गमाहूय ।
परिणयमण्डपमचिरा-
द्धिक्कृतनाकं प्रकल्पयामास ॥ ३४ ॥

अखिलं तद्राजकुलं
मङ्गलमयमिव मनोरमं वृत्तम् ।
लक्ष्मीकल्पशशतशः
सम्मिलितः पौरसुन्दरीवर्गः ॥ ३५ ॥

जामातुरन्तिकादथ
भूपश्श्रुत्वा समागतं दूतम् ।
आहूय प्रणतममुं
कुशलमपृच्छद्वरस्य सानन्दम् ॥ ३६ ॥

ज्ञात्वा वार्तां तस्मा-
त्प्रथमे यामे यथाद्ययामिन्याः ।
पाणिग्रहोत्सवस्या-
न्निरन्तरायस्तथाविधातव्यम् ॥ ३७ ॥

इति पारिजातकाख्यं
कृतसत्कारं विसृज्य दूतं तम् ।
पाणिग्रहोपयुक्तं
कार्यमतानीत्प्रमोदेन ॥ ३८ ॥

सन्ध्या सरागमाया-
दुत्सववीक्षोत्कचित्तेव ।
गृहवर्मापि तदासौ
सालंकारस्समाययौ हृष्टः ॥ ३९ ॥

राजा तं द्वारगतं
श्रुत्वा पद्मथां समेत्य सानन्दम् ।
आपृच्छ्य कुशलवार्तां
बाहुभ्यां गाढमाश्लिष्य ॥ ४० ॥

हस्ते गृहीन्ये
गृहवर्माणं गृहान्तरवनीपः ।
तत्र च कामं चक्रे
पूजां वाचामगोचरां तस्य ॥ ४१ ॥

अत्रान्तरे नृपं तं
दैवज्ञास्संभ्रमेण संगम्य ।
वरवीक्षणलग्नमितं
जामाता यातु कौतुकागारम् ॥ ४२ ॥

इत्यूचुस्तदनु नृपः
प्राहैषीत्तं गृहान्तरतिशीघ्रम् ।
हृष्टस्स च जामाता
कौतुकगेहं जगाम कुतुकेन ॥ ४३ ॥

कतिपयसखीभिरिद्धां
मितपरिवारां मृगेक्षणां तत्र ।
अरुणांबरावकुंठित-
वरलपनसुधाकरां पृथुश्रोणीम् ॥ ४४ ॥

बिम्बाधरां सुगात्रीं
पीनोरोजां तलोदरीं सुदतीम् ।
भूषाभिर्विविधाभिः
कान्तां पुनरुक्तलावण्याम् ॥ ४५ ॥

ढप्रे शुभे सखीभिः
धृतवक्त्रां वीक्षणाय कुतुकेन ।
साभिप्रायैर्वचनैः
सरसैर्मधुरैरतीव परिहसिताम् ॥ ४६ ॥

मन्दाक्षेणसखीस्ता
वारं वारं प्रतर्जयन्तीं च ।
राज्यश्रियमिव दीप्रां
रूपवतीं तां ददर्श भूपसुताम् ॥ ४७ ॥

अभ्याशमेत्य तस्याः
कृत्वा हस्ते कराम्बुजं तन्व्याः ।
हास्यैस्सखीजनानां
प्राप विवाहाय कल्पितां वेदीम् ॥ ४८ ॥

गत्वाऽशोकसमीपं
भक्त्या वह्निं प्रदक्षिणीकृत्य ।
लाजाञ्जलिप्रदाना-
त्पीनं चक्रे कृशानुमपि ॥ ४९ ॥

अत्रान्तरे सबाष्पे
नयने बध्वा बभूवतुस्तस्याः ।
तद्विरहाकुलचित्ताः
बन्धुजनाश्चापि रोदनं चक्रुः ॥ ५० ॥

विधिना विवाहकार्ये
पूर्णे तौ दम्पती नव्यौ ।
श्वशुरौ प्रणम्य हर्षा-
च्छयनागारं सुसज्जितं विविशुः ॥ ५१ ॥

तत्र च लज्जातिशया-
दवाङ्मुखत्वं प्रपद्य सुप्रायाः ।
अनुनयवचनैर्भर्तुः
प्रसादमाप्ता त्रियामैव ॥ ५२ ॥

तदनु तया सानन्दं
क्षणमिव नीत्वा दिनानि दश वध्वा ।
राज्ञा विसर्जितोऽयं
प्रययौ देशं निजं प्रियया ॥ ५३ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्यहर्षचरिते
चतुर्थ उच्छ्वासः ॥

पञ्चम उच्छ्वासः ॥

नियतिर्विधाय पुंसां
प्रथमं सुखमुपरि दारुणं दुःखम् ।
कृत्वा लोकं तरला
तटिदिव वज्रं निपातयति ॥ ४० ॥

पातयति महापुरुषा-
न्सममेव बहूननादरेणैव ।
परिवर्तमान एकः
कालश्शैलानिवानन्तः ॥ ४१ ॥

तदनु कदाचिद्राजा
हूणान्हरिणानिव हरिर्हन्तुम् ।
विससर्ज राज्यवर्धन-
मचिरात्स बलं कुबेरदिग्भागे ॥ १ ॥

यान्तं तमनु सहर्षः
प्रायादारुह्य वाजिनं जविनम् ।
समया तुषारशैलं
क्रीडन्भ्रात्रा दिनानि कानिचित्तस्थौ ॥ २ ॥

अल्पीयोभिर्दिवसैः
अजनि वनं घोरसत्वनिर्मुक्तम् ।
तदनु कदाचिच्चरमे
यामे स्वप्ने स यामिन्याः ॥ ३ ॥

चटुलज्वालामाला
पिञ्जरिताशासु दीप्यमानेन ।
दवदहनेनात्यन्तं
केसरिणं दह्यमानमद्राक्षीत् ॥ ४ ॥

किं च ददर्श तदानीं
दवदहने तूर्णमुत्प्लुत्य ।
कान्तेन मर्तुकामां
पतितां पर्याकुलां सिंहीम् ॥ ५ ॥

तिर्यञ्चोऽपि हि लोके
कठिनतरस्नेहपाशसंबद्धाः ।
प्राणानपि तृणकल्पान्
मन्यन्ते हेति चिन्तयामास ॥ ६ ॥

जाग्रत्तदनु निमित्तं
दुष्टं दृष्ट्वा बभूव दुःखार्तः ।
किमिदमिति शङ्कमानः
शय्यां तत्राध्यशेत वेत्रमयीम् ॥ ७ ॥

दूरादेव तदानीं
भीकररूपं विचित्रवेषं च ।
दुर्वार्तामिव वक्तुं
प्राप्तमपश्यत्कुरङ्गकाभिख्यम् ॥ ८ ॥

सोऽप्यागत्य समीपं
प्रणम्य लेखं कमप्यदात्तस्मै ।
आदाय तं कुमारः
स्वयमेवावाचयत्पत्रम् ॥ ९ ॥

अस्वास्थ्यं तातस्य
ज्ञात्वा तस्मात्तथैव विज्ञाय ।
आर्तस्सहसा शांत्यै
विप्रेभ्योऽदात्समस्तपरिवर्हम् ॥ १० ॥

अनुपदमारुह्याश्वं
जविनं तुङ्गं कुरङ्गकानीतम् ।
अनिमित्ताकुलचेताः
एकः प्रययौ जवेन बहुदूरम् ॥ ११ ॥

भास्वत्यपि मलिनमुखे
मलिनमुखं वीक्ष्य खिन्न इव ।
अनुनीतोऽपि सतीर्थ्यैः
मार्गेऽनभ्रञ्जगाम नक्तमपि ॥ १२ ॥

अन्यस्मिन्नहनि निजं
स्कन्धावारं प्रसुप्तमिव मोहात् ।
कवलितमिव कलिनाऽऽर्मं-
गलपुञ्जैरिवावृतं प्रययौ ॥ १३ ॥

प्रविशन्नेव विपण्या-
मुच्छ्रितशमनेद्धचित्रपटे ।
निर्दिशता यमचरितं
पद्यं शुश्राव केनचित्पठितम् ॥ १४ ॥

मातापितृसहस्राणि
पुत्रदारशतानि च ।
युगे युगेऽत्यतीतानि
कस्य ते कस्य वा भवान् ॥ ४२ ॥

इति तेन पीडितोऽसौ
राजद्वारं ययौ विजनम् ।
तुरगादवतीर्य पुरो
वैद्यकुमारं सुषेणमद्राक्षीत् ॥ १५ ॥

अप्राक्षीच्च तमेनं
तातो मे कीदृगस्तीति ।
सोऽपि जगाद कुमारं
नेदानीं किमपि चिन्तनीयमिति ॥ १६ ॥

अथ च विविधैर्वचोभिः
संसृतिनिन्दामतीव कुर्वद्भिः ।
पौरैराकुलहृदयैः
परिगतमखिलैर्विवेश राजगृहम् ॥ १७ ॥

विविधौषधगन्धमयीं
निजजनयुक्तां तृतीयकक्ष्यां च ।
प्राप्य व्याधिपरीतं
ग्रासीकृतमिव च गात्रभङ्गेन ॥ १८ ॥

ग्लान्या नितरां ग्रस्तं
कबलितमिव जागरेण विपुलेन ।
आयुषि नितरां क्षीणं
विरलं वचने च संततं श्वसिते ॥ १९ ॥

पार्श्वस्थितया देव्या
सकरुणमाभाषमाणया दुःखात् ।
मुहुरुरसि मस्तकेऽपि च
पितरं स्वं स्पृश्यमानमद्राक्षीत् ॥ २० ॥

तदवस्थमुपेत्य नृपं
कलयन् शून्यं च जगदखिलम् ।
प्रतिपत्तिमन्थरोगा-
न्मनसा शिरसा भयं च भूमिं च ॥ २१ ॥

भूपस्तु सुतं दयितं
सहसा बाहू प्रसार्य कुतुकेन ।
एह्येहीति च कथयं-
स्तादृगवस्थोऽप्यमुं समाश्लिष्य ॥ २२ ॥

पार्श्वे निवेश्य तनयं
स्पृष्ट्वा कंस्प्रेण पाणिना कृच्छ्रात् ।
वत्स कृशोऽसि कथं त्वं
संप्रति हर्षेति पप्रच्छ ॥ २३ ॥

भंडिस्तु जगाद नृपं
देव कुमारस्य दूनहृदयस्य ।
कलिताहारस्येदं
दिनमधुना हा तृतीयमस्तीति ॥ २४ ॥

श्रुत्वा सबाष्पनयनो
बहुधा हर्षं प्रशस्य चाह स्म ।
त्वयि सति च कृताहारे
तत एवाहं करोमि पथ्यमिति ॥ २५ ॥

तदनु स राज्ञाऽऽदिष्टः
चिन्ताकृष्टः प्रविश्य भुक्तिगृहम् ।
कतिचित्कवलांश्च बला-
द्भुक्त्वा तातान्तिकं पुनः प्रययौ ॥ २६ ॥

कति च न पृष्टा भिषजः
शुभवार्तामेव काममाचख्युः ।
तेषां मध्ये धीमा-
न्नसायनाख्यो भिषक्सूनुः ॥ २७ ॥

सान्नस्तूष्णीं स्थित्वा
क्षणमात्रमधोमुखोऽवादीत् ।
अवनिप रात्रावस्यां
यातायां श्वः प्रवक्ष्यामि ॥ २८ ॥

इति वदति वैद्यपुत्रे
गृहमध्ये भवनकमलिनीपालः ।
आश्वासयंश्चकोरं
तारमगासीदिदं पद्यम् ॥ २९ ॥

विहग कुरु दृढं मनस्त्व-
यं त्यज शुचमास्व विवेकवर्त्मनि ।
सह कमलसरोजिनी श्रिया
श्रयति सुमेरुशिरो विरोचनः ॥ ४३ ॥

वाचां निमित्तकुशलः
पार्थिवसूनुस्तदेतदाकर्ण्य ।
शिथिलीचक्रे सुतरां
जीविततृष्णां तदा जनके ॥ ३० ॥

क्षितिपे प्रलपति कामं
दीनमना भूपतेस्सूनुः ।
दुःखायतां त्रियामा-
मपि शतयामामिवानैषीत् ॥ ३१ ॥

कल्ये स्वमुपेत्य गृहं
प्रातः कृत्यं विधाय विधिनोक्तम् ।
अग्रिमविशद्रसायन
इति गदितां वाचमकर्ण्य ॥ ३२ ॥

तातस्य दशां दशमीं
द्रष्टुमधीरो जहौ प्राणान् ।
धन्यस्स एव लोके
वयमखिला भारभूता स्मः ॥ ३३ ॥

इति कथयन्दुःखार्तः
पटेन वक्त्रं पिधाय शय्यायाम् ।
तूष्णीमशते हर्षः
सदनं प्रययौ पितुर्न भूयोऽपि ॥ ३४ ॥

इत्थं भूते समये
लोकाश्शोकाकुला जाताः ।
भूताश्च महोत्पाताः
भूतानां भीकरा विशेषेण ॥ ३५ ॥

अन्यस्मिन्नहनि शुचा
दूनं हर्षं समेत्य वेलाख्या ।
दूती जगाद जननीं
त्रायस्वाद्यैव मर्तुकामां ते ॥ ३६ ॥

इति वज्रकल्पमेत-
द्वचनं श्रुत्वातुरः प्रययौ ।
पतिमृतिमनुचिन्त्य मुहु-
र्विलपन्तीं मातरं ददर्शाग्रे ॥ ३७ ॥

अंब प्रसीद मेति
प्रवदंस्तस्याः पपात पादतले ।
साप्यासीदश्रुझरैः
सूनोश्शोकाग्निमपहरन्तीव ॥ ३८ ॥

शान्तेऽथ शोकवेगे
दीर्घं निश्वस्य पुत्रमुत्थाप्य ।
अश्वास्याथ च देवी
प्रविवेशाग्निं निवार्यमाणापि ॥३९ ॥

भूपतिसूनुर्मातु-
मरणादूनो मुमूर्षुमथ पितरम् ।
दृष्ट्वा वर्षन्बाष्पं
घन इव गर्जन्रुरोद तारतरम् ॥ ४० ॥

राजा चिराय बुध्वा
तनयं सास्रश्शनैश्शनैरारात् ।
आहूय साधुवादान्
कथयन्निद्रामवाप बत दीर्घाम् ॥ ४१ ॥

भूपतिनाशात्सुतरां
तेजोनिधिरपि तेजसा हीनः ।
शोकादिवाब्धिमध्ये
पतितस्सहसा तिरोभूतः ॥ ४२ ॥

अथ तत्र भूपसूनौ
रुदति चिरं मुक्तकण्ठमतिशोकात् ।
कृशतनुरिव दूरमगा-
द्रजनी निद्रा च हर्षमुन्मुच्य ॥ ४३ ॥

प्रातस्सचिवप्रमुखैः
पौरैः प्रकृतिं कथंचिदपि नीतः ।
पित्रोरन्त्येष्टिविधिं
हर्षश्चक्रे यथागमं भक्त्या ॥ ४४ ॥

सुहृदस्स्वजना गुरवो
मस्करिणो ब्रह्मवादिनश्चापि ।
पौराणिकाश्च वृद्धा
हर्षं शोकान्निवारयामासुः ॥ ४५ ॥

मनसा विचिन्त्य बहुधा
भूपतिरूपं गुणांश्च चर्यां च ।
भ्रातुस्स्वस्यागमनं
कथमपि तस्थौ प्रतीक्षमाणोऽथ ॥ ४६ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्यहर्षचरिते
पञ्चम उच्छ्वासः ॥



षष्ठ उच्छ्वासः ॥



उचित्योचित्य भुवि
प्रहितनिगूढात्मदूतनीतानाम् ।
विजिगीषुरिव कृतान्तः
शूराणां संग्रहं कुरुते ॥ ४३ ॥

विश्रब्धघातदोषः
स्ववधाय खलस्य वीरकोपकरः ।
नवतरुभंगध्वनिरिव
हरिनिद्रातस्करः करिणः ॥ ४४ ॥

अशुचिदिनेषु गतेषु
श्राद्धं साङ्गं विधाय जनकस्य ।
भूदेवेषु सहर्षो
धनवृष्टिं कालमेघ इव चक्रे ॥ १ ॥

नातिचिरादायातं
　　शमितारातिं जयश्रियायुक्तम् ।
पित्रोर्मरणश्रवणा
　　न्निश्रीकं म्लानमुखचन्द्रम् ॥ २ ॥

पिष्टमिव शुचा नितरां
　　गिरिमिव गुरुवज्रपातसंदीर्णम् ।
आत्मीकृतमिव रुजया
　　दासीकृतमिव च दौर्मनस्येन ॥ ३ ॥

क्रीतमिव च कृशिम्ना
　　शिष्यीकृतमिव च शोचितव्येन ।
अग्रजमालोक्य हठा-
　　त्त्वरभसमुत्थाय दुद्राव ॥ ४ ॥

अभिमुखमागतमनुजं
　　हर्षं गाढं समाश्लिष्य ।
साश्रुस्तारमरोदी-
　　न्नृपमौली राज्यवर्धनाभिख्यः ॥ ५ ॥

प्रकृतिमुपेत्याचिरा-
त्स्नात्वा कर्तव्यमखिलमपि कृत्वा ।
तूष्णीमास्तां दूनौ
निशापि दूरंजगाम दूनेव ॥ ६ ॥

कल्ये हर्षमवादी-
द्भ्राता ज्येष्ठस्सुनीतिसंपन्नः ।
भवविद्वेष्टृ मह्यं
राज्यमिदं नैव रोचते सत्यम् ॥ ७ ॥

कुहचन कान्तारपदे
फलमूलैः कालमत्येतुम् ।
चेतो मदीयमधुना
विषयविदूरं समीहते कामम् ॥ ८ ॥

अद्य प्रभृति सुशीलं
राज्यश्रीस्त्वामुपेत्य गतशंका ।
स्यादित्युक्त्वा शस्त्रं
गृहाण वत्सेत्यधो विजहौ ॥ ९ ॥

तच्छ्रुत्वाऽशनिकल्पं
वचनं चिन्ताकुलो हर्षः ।
असदृशमिदमार्यस्य
भ्रातुर्मे पुष्पभूतिकुलजस्य ॥ १० ॥

यद्यपि मृगयुरहिंस्रः
प्रियवाग्लोके नृशंसश्च ।
मन्त्री सत्याख्यायी
धनवानखलस्सुखी भृत्यः ॥ ११ ॥

प्रभुरभिमानविहीनः
सूनुर्नृपतेरदुर्विनीतश्च ।
विद्यवानदरिद्रो
यतिरबुभुक्षुश्च दुर्लभो नूनम् ॥ १२ ॥

ज्येष्ठस्तथापि पूज्यः
पितृवद्भ्राताऽनुजन्मभिस्सततम् ।
तस्मात्त्वत्परिचर्यां
कर्तुं सिद्धोऽस्मि कानने हृष्टः ॥ १३ ॥

इत्यवधार्य हृदासौ
तूष्णीमासीदवाङ्मुखो हर्षः ।
अत्रान्तरे तु भृत्यः
कोऽपि सभां प्राप संभ्रान्तः ॥ १४ ॥

साश्रु जगाद च कृच्छ्रात्
गृहवर्मा मालवावनीपेन ।
हन्त हतो राज्यश्री-
र्निक्षिप्ता कान्यकुब्जकारायाम् ॥ १५ ॥

इति दूतमुखाद्वचनं
श्रुत्वाऽथो राज्यवर्धनः क्रुद्धः ।
भंडिरयुतैस्तुरङ्गै-
रधुनैवाभ्येतु मामिति प्राह ॥ १६ ॥

प्रतिषिद्धोऽथ भ्रात्रा
हर्षः खिन्नोऽब्रवीत्साश्रम् ।
अर्य प्रसीद नय मा-
मिति चरणौ पाणिना स्पृष्ट्वा ॥ १७ ॥

उत्थाप्य तं नृपाल-
स्तात न मामन्यथाऽवेहि ।
परिपालय राज्यमिदं
हत्वा तं मालवेन्द्रमद्यैव ॥ १८ ॥

आगन्तास्मीत्युक्त्वा
प्रायात्तस्मिन्नहन्येव ।
भ्रातरि याते हर्षः
कालमनैषीत्कथंचिदपि दूनः ॥ १९ ॥

काले गते बहुतिथे
दुःखान्नक्तं प्रजागरीभूय ।
शय्यामधिशय्यार्यो
यामिकगीतां प्रशुश्राव ॥ २० ॥

द्वीपोपगीतगुणमपि
समुपार्जितरत्नराशिसारमपि ।
पोतं पवन इव विधिः
पुरुषमकाण्डे निपातयति ॥ ४५ ॥

श्रुत्वा तां दूनमना
कल्ये निद्रां कथंचिदपि लब्ध्वा ।
हर्षस्तुङ्गं स्तंभं
लोहमयं भज्यमानमद्राक्षीत् ॥ २१ ॥

दुस्स्वप्नैर्दुश्शकुनै-
रुत्पातैस्सन्ततं समुद्भूतैः ।
भ्रात्रे स्वस्तीत्युक्त्वा
चिन्तासक्तः प्रगेतनं चक्रे ॥ २२ ॥

अथ तत्र बाष्पनेत्रं
भृत्यं ज्येष्ठस्य कुन्तलाभिरूयम् ।
दृष्ट्वा स जातशंक-
स्संभ्रमयुक्तस्तमेनमप्राक्षीत् ॥ २३ ॥

सोऽप्याह कंपमानः
भ्राता ते गौडभूपेन ।
कूटेन निजनिशांते
हन्त हतो राज्यवर्धनाभिरूयः ॥ २४ ॥

हर्षः श्रुत्वा वृत्तं
तारतरं कालरुद्र इव ।
गर्जन्श्वसंश्च दीर्घं
दुर्दर्शां प्रकृतिमापेदे ॥ २५ ॥

गौडनृपाल दुरात्म-
न्नुदपेषं त्वां पिनष्मि हतबुद्धे ।
इत्थं वदति महीपे
जनकसखः सिंहनादाख्यः ॥ २६ ॥

सुनयज्ञः प्रतिभावा
नैश्वर्यं शौर्यवारिधेर्महसः ।
अंकुशकल्पो मदिनां
निर्वोढा प्रौढवादानाम् ॥ २७ ॥

समराणां मर्मज्ञः
कुलगुरुरुर्वीस्थवीरगोष्ठीनाम् ।
ज्ञानवयोभ्यां वृद्ध
स्सेनानीर्वाक्यकोविदोऽगादीत् ॥ २८ ॥

देवाऽनया शुचा किं
गौडमिदानीं हतं विद्धि ।
इति सोत्साहवचोभिः
प्रोत्साह्यैनं रणाय विरराम ॥ २९ ॥

आकर्ण्याऽथ बभाषे
हर्षो हर्षेण वाहिनीनाथम् ।
प्रोक्तं भवता युक्तं
करणीयं नस्तदेव संजातम् ॥ ३० ॥

इति तं प्रशम्य हर्षः
सेनाश्चादिश्य युद्धाय ।
माध्याह्निकं यथोक्तं
कृत्वा दिवसं निनाय दुःखेन ॥ ३१ ॥

रात्रावथाधिशयनं
न्यपातयत्स्वानि गात्राणि ।
दीपाद्वितीयमेनं
सहसा जग्राह सौदरश्शोकः ॥ ३२ ॥

वस्त्रांचलेन वक्त्रं
पिधाय कामं रुरोद निश्शब्दम् ।
तदनु विविधैः प्रलापैः
रजनीं तामत्यवाहयत्कृच्छ्रात् ॥ ३३ ॥

प्रातस्सुलक्षणाढ्यं
दूताहूतं प्रविश्य राजकुलम् ।
नातिनिकटे निषण्णं
कृताञ्जलिं स्कन्धगुप्तमभिवीक्ष्य ॥ ३४ ॥

देवो जगाद हर्षः
सेनास्सहसा प्रयान्तु समराय ।
श्रुत्वा सेनाध्यक्ष-
स्तथेति नम्रः पुनः प्राह ॥ ३५ ॥

देशाचारा भिन्नाः
लोके सर्वत्र सर्वदा राजन् ।
सहजास्वदेशयोग्या
त्याज्या विस्रब्धताऽन्यत्र ॥ ३६ ॥

विस्रंभादेव हता
बहवो बलिनोऽपि शत्रुभिर्जगति ।
श्रावस्त्यां श्रुतवर्मा
विगतश्रीको बभूव नरनाथः ॥ ३७ ॥

बलिनोऽपि पंचतामू-
त्पद्मावत्यां हि नागसेनस्य ।
भूपः कांचनचूडो
व्यसुरभवन्मृत्तिकावत्याम् ॥ ३८ ॥

नक्तं ममन्थ लुब्धं
बृहद्रथं तं विदूरथाभिख्यः ।
वस्त्सेशं विगतासुं
भूपमहासेनसैनिकाश्चक्रुः ॥ ३९ ॥

अलुनात्सुमित्रनाम्न-
श्शीर्षं खड्गेन मित्रदेवाख्यः ।
शरभस्या श्मकभर्तु-
श्चिच्छिदुररयः शिरः कपटात् ॥ ४० ॥

स्वपतिमपि पुष्पमित्रः
पिपेष मौर्यं बृहद्रथं सबलः ।
चंडीपतिरपि यवनै-
र्निन्ये कुहचिन्नभोविमानेन ॥ ४१ ॥

खड्गेन निचकृते हा
नगरसमीपेऽपि सैशुनारिश्च ।
वाराङ्गनया शुङ्गः
सचिवेनाकारि गतजीवः ॥ ४२ ॥

उपधानतामुपेतो
भ्रातरमवधीद्धतानुजो दध्रम् ।
अरिगेहे परतरुणीं
शकपतिरिच्छन् जगाम संयमिनीम् ॥ ४३ ॥

रत्नवती जारूथं
दर्पणधारावलादवधीत् ।
कान्तं देवरसक्ता
सिन्धाहं देवकी न्यवधीत् ॥ ४४ ॥

वैरन्त्यरन्तिदेवं
जघान पत्न्येव जायया युक्तम् ।
वृष्णिविधूरथमवधी-
द्विन्दुमती विषनिषिक्तमेखलया ॥ ४५ ॥

हंसवती सौवीरं
सोमकमवधीच्च पौरवी निभृतम् ।
इत्युक्त्वा सेनानीः
राजादेशं ययौ कर्तुम् ॥ ४६ ॥

विजयायाऽथो हर्षे
सन्नद्धे शत्रुराज्येषु ।
दुश्शकुनान्यपि बहुधा
प्रादुरभूवन्विशेषेण ॥ ४७ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्महर्षचरिते
षष्ठ उच्छ्वासः ॥



सप्तम उच्छ्वासः ॥

अङ्गणवेदी वसुधा
कुल्या जलधिः स्थली च पातालम् ॥
वल्मीकश्च सुमेरुः
कृतप्रतिज्ञस्य वीरस्य ॥ ४५ ॥

धृतधनुषि बाहुशालिनि
शैला ननमन्ति यत्तदाश्चर्यम् ।
रिपुसंज्ञकेषु गणना
कैव वराकेषु काकेषु ॥ ४६ ॥

अथ कतिपयदिवसेभ्यः
परमहनि नृपः प्रशस्तशुभलग्ने ।
इष्ट्वा देवं हुत्वा
वह्निं भूरीणि भूसुरेभ्योऽदात् ॥ १ ॥

निखिलैरथ सुनिमित्तैः
प्रीतः प्रीतैः पुरः प्रधावद्भिः ।
भृत्यैरहमहमिकया
सन्नुतकीर्तिः पुरात्प्रययौ ॥ २ ॥

नगरोपकंठदेशे
तीरे नद्यास्सरस्वतीनाम्न्याः ।
रचिते तार्णनिवासे
वासमकार्षीन्नृपो हर्षः ॥ ३ ॥

तत्र च हस्ताद्भ्रष्टां
मुद्रामालोक्य साशंकः ।
अपशकुनशमनबुद्ध्या
विप्रेभ्योऽदाच्छतं ग्रामान् ॥ ४ ॥

तत्रोषितः प्रभाते
चतुरङ्गं स्वं बलं पुरस्कृत्य ।
कृतमङ्गलः प्रतस्थे
रिपुपुरनाशाय फालनेत्र इव ॥ ५ ॥

भग्नपद याहि दूरं
यावन्नाश्वाः पतन्त्युपरि ।
गमयसि कथमिममुष्ट्रं
भाव पुरोदृष्टिमवधेहि ॥ ६ ॥

इत्वर किमिव त्वरसे
सरणिं त्यक्त्वाऽन्यतो यासि ।
बत महिष चणकगोणी
भ्रष्टा शकटात्प्रयासि किं मूढ ॥ ७ ॥

अवटं शकटं नयसे
वेत्सि न मामा रटन्तमपि ।
सौवीरककुम्भो मे
भग्नो हा मन्थरं याहि ॥ ८ ॥

किमिह विचिनोषि बदरं
चेट सुदूरं हि गन्तव्यम् ।
धव वाहय वाहांस्त्वं
शकटः श्वभ्रे पापत हा वृषभ ॥ ९ ॥

तात प्रसर निकामं
भाव मुधा त्वं विलंबसे किमिति ।
साटोपं बलमखिलं
स्वयमपि दृष्ट्वा विसिष्मये हर्षः ॥ १० ॥

चलति बलेऽथ स दर्पं
प्रत्नमहीपालिनिर्जितारातौ ।
कियदिह लोकेऽस्माकं
जन्यं शूराग्रगण्यानाम् ॥ ११ ॥

इत्यनुयायि नृपेन्द्रैः
कथितामाकर्ण्य घोषणां हृष्टः ।
कटकसमीपे रचितं
स्वावासं प्राप नृपचन्द्रः ॥ १२ ॥

अथ तत्र कोऽपि भृत्यः
भूपनिदेशात्समानयत्तूर्णम् ।
प्राग्जोतिषादुपेतं
वचनहरं हंसवेगनामानम् ॥ १३ ॥

सोऽपि प्रणम्य हर्षं
प्राभृतमेकं निधाय पुरतोऽस्य ।
वारुणमातपवारुण-
मतुलमनर्घं महाद्भुतं दृश्यम् ॥ १४ ॥

सितमिव तिलकं जगता-
मिन्दोरंशावतारमिव ।
मौक्तिकजालकनद्धं
चामरिकाभिः परीतपरिवेषम् ॥ १५ ॥

हंसेन शिखरदेशे
विततपतत्रेण लक्ष्मणा दीप्तम् ।
दण्डेन राजमानं
मन्दाकिन्या मृणाळकल्पेन ॥ १६ ॥

अस्मत्स्वामी भवतः
पादसमीपे विराजतामेतत् ।
इत्युक्त्वा मन्मुखतः
सानन्दं प्राहिणोदिति प्राह ॥ १७ ॥

चित्रीयमाणचेता
राजा तच्छत्रमालोक्य ।
सुशकुनमिदमिति मत्वा
सादरमादाय तन्मुमुदे ॥ १८ ॥

दूतं विसृज्य तदनु
स्नात्वा च्छायामवाप पुनरस्य ।
अमृताब्धाविव मग्नः
परमानन्दं ययौ हर्षः ॥ १९ ॥

प्राग्जोतिषदूताय
प्रददौ वस्तून्यनेकानि ।
विपुलं च भोज्यजातं
दापयति स्मातिहर्षेण ॥ २० ॥

अथ तत्र वितानतले
भूपः स्थित्वा विसर्जयन्सर्वान् ।
विभ्रम्यागतमवदी-
दूतं सन्देशमाहरेत्यथ ॥ २१ ॥

सोऽपि प्रणम्य वक्तुं
प्रास्तावीदेवपदमूले ।
पूर्वं वराहसङ्ग्रा-
दसाविभूम्याऽसुरो नरकः ॥ २२ ॥

तस्यान्वये विशाले
भगदत्ताद्येषु भूपेषु ।
सुस्थिरवर्मा भूपः
प्रादुरभूत्तेजसां राशिः ॥ २३ ॥

आसीद्भास्करवर्मा
तस्य तनूजस्सुशीलसंपन्नः ।
सोऽपि विना गौरीशं
न कदापि परं सुरं नमति ॥ २४ ॥

ईदृक्षो नस्स्वामी
भवतस्सुगुणैस्सुसंतुष्टः ।
मैत्रीमिच्छति भवता
सकलमहीपाललालितः प्रणतः ॥ २५ ॥

इति गदितवचसि तस्मि-
न्भूपस्सानन्दमब्रवीद्दूतम् ।
वयमपि मैत्रीपाशा-
कृष्टास्तं भूपमीक्षितुं सिद्धाः ॥ २६ ॥

इति नृपगदितं वचनं
श्रुत्वा दूतो जगाद वाक्यज्ञः ।
सेवायत्तेन मया
राजा देशो न्यवेदि भवदग्रे ॥ २७ ॥

सेवा श्ववृत्तिरिति या
विदुषां वागस्ति सा सत्या ।
दुर्जननीव तनूजां
सेवां सर्वाश्च दुर्गतिर्नयति ॥ २८ ॥

कान्तामिव चातुष्टि-
स्तृष्णा च जनस्य तां कुरुतः ।
संक्रान्ता साप्यधिकं
भ्रमयति सकलान्पिशाचीव ॥ २९ ॥

दासीभूतस्यास्या:
मानविहीनस्य भृतकहतकस्य ।
का निष्कृतिर्निगदिता
कुत्र च तस्यास्ति शान्तिरपि ॥ ३० ॥

कीदृग्जीवितमपि वा
भोगश्रद्धा च कीदृशी तस्य ।
कश्च पुरुषाभिमानः
किन्नामानो विलासाश्च ॥ ३१ ॥

तस्माद्धिक्तां सेवां
तज्ज्ञातेभ्यो नमोस्तु शर्मभ्यः ।
तिष्ठतु दूरे सा श्री-
र्मास्तु न कस्यापि तादृशी सेवा ॥ ३२ ॥

अस्माकं तु नरेशो
न तथा भृत्यान्प्रवर्तयते ।
वयमपि भक्तास्तस्मि-
न्सुतकल्पास्स्मः स्वकार्यसंसक्ताः ॥ ३३ ॥

अत्र च भवता कामं
सभाजितो दानमानाभ्याम् ।
इत्यभिधाय स हृष्टो
बहुधा हर्षं प्रशस्य निरयासीत् ॥ ३४ ॥

ज्ञात्वा ततो महीपो
मालवदेशात्समागतं भंडिम् ।
तस्य निरीक्षणहेतो-
स्त्रस्रास भ्रातृशोकार्तः ॥ ३५ ॥

अवतीर्याऽथ तुरङ्गा-
द्भंडिः प्रासादमुपगम्य ।
दूरान्नृपतेरग्रे
मुक्ताक्रन्दः पपात गतसंज्ञः ॥ ३६ ॥

उत्थाप्य तं नरेन्द्रो
बाहुभ्यां गाढमुपगुह्य ।
करुणतरं क्रन्दित्वा
वधवार्तां पृष्टवांस्ततो भ्रातुः ॥ ३७ ॥

ज्ञात्वा तस्मादखिलां
वार्तां भ्रातुर्मृतस्य दीनतराम् ।
विन्ध्याटवीं प्रविष्टां
देवीं राज्यश्रियं च सहजाताम् ॥ ३८ ॥

आदाय कटकमेनं
गौडं याहीति भंडिमादिश्य ।
स्वयमेव तां विचेतुं
मितपरिवारो जगाम विन्ध्यवनम् ॥ ३९ ॥

तत्र च दूरे हर्षः
पादपसंघैर्मनोहरैर्विविधैः ।
श्यामीकृतोपकंठं
वन्यानेकप्रसूनवरगन्धम् ॥ ४० ॥

वरभृतपंचमनादै-
र्मायूरैष्षड्जानिर्ह्रादैः ।
अन्यैर्विहंगनिनदै-
रधरीकृतनाकसौभाग्यम् ॥ ४१ ॥

नानाविधसत्वयुतं
पर्णागारैश्च मंजुलैरिद्धम् ।
अटवीनिवासिमनुजै-
स्सकलकलं ग्रामकं ददर्शाग्रे ॥ ४२ ॥

इति वात्स्यराजगोपालचक्रवर्तिकृते पद्यहर्षचरिते
सप्तम उच्छ्वासः ॥



अष्टम उच्छ्वासः ॥

—*—

सहसा संपादयता
मनोरथप्रार्थितानि वस्तूनि ।
दैवेनापि क्रियते
भव्यानां पूर्वसेवेव ॥ ४७ ॥

विद्वज्जनसंपर्को
नष्टेष्टज्ञातिदर्शनाभ्युदयः ।
कस्य न सुखाय भवने
भवति महारत्नलाभश्च ॥ ४८ ॥

अपरेद्युरथ महीशः
प्रस्थाय ग्रामकात्तस्मात् ।
विन्ध्याटवीं जगाहे
सुबहूंस्तत्राट तत इतो दिवसान् ॥ १ ॥

तत्रैकदा स्थविष्ठं
चिपिटोष्ठं चिकिनचुबुकं च ।
अवनाटनासिकं च
त्रापुषवलयं करेण बिभ्राणम् ॥ २ ॥

चार्मणकञ्चुकनद्धं
मूर्तिमुपेतं च पापराशिमिव ।
आदाय शबरसूनुं
शरभसुतो व्याघ्रकेतुरायातः ॥ ३ ॥

सामन्तभूपमौलिः
प्रणम्य हर्षं जगाद नृपतिलकम् ।
अत्रास्ति शबरनाथ-
स्वामी नम्रर्षविन्ध्यस्य ॥ ४ ॥

भूकम्पो नाम विभो
स्वस्रीयस्तस्य निर्घातः ।
सोऽप्यत्रैव बलेशो
भवति विनम्रोऽत्र भवतीति ॥ ५ ॥

तदनु नृपस्यादेशा-
दाहूतस्तूर्णमेत्य निर्घातः ।
प्राभृतमवनीपतये
तित्तिरिमेकं शशं च ददौ ॥ ६ ॥

सम्मानयंस्तमेनं
निर्घातं भूप एवमप्राक्षीत् ।
अङ्ग बलेशाऽत्रवने
रूपवती कापि दृष्टेति ॥ ७ ॥

सोपि जगाद महीपं
देव न दृष्टाऽत्र तादृशी प्रायः ।
अबला तथापि नितरां
क्रियते तन्मार्गणे यत्नः ॥ ८ ॥

मुनिजनमहिते विपुले
नातिविदूरेऽत्र तरुषण्डे ।
छात्रैर्बहुभिर्युक्तः
पिण्डादी कोऽपि वर्तते श्रमणः ॥ ९ ॥

स इमां वार्तां विन्दे-
दिति तूष्णीं भावमापेदे ।
अज्ञासीत्तदनु नृप-
स्तममुं गृहवर्मणो मित्रम् ॥ १० ॥

तेन सहैव प्रययौ
श्रमणं तं पिण्डपातिनं द्रष्टुम् ।
मध्येपथं च चित्रा-
श्श्यामास्तरवोऽस्य दृष्टिमाजग्मुः ॥ ११ ॥

याति भदन्तनिवासे
दृष्टिपथं दूर एव बलमखिलम् ।
विनिवेश्य भूपतीन्दु-
श्चरणाभ्यामेव गन्तुमारेभे ॥ १२ ॥

तत्र तरूणां मध्ये
स्थानस्थानेषु कुञ्जेषु ।
तरुमूलेषु शिलासु
स्थाणुषु चाक्लेशमासीनैः ॥ १३ ॥

मस्करिभिश्श्वेतपटै-
र्लोकायतिकैश्च कापिलैर्जैनैः
काणादैर्भागवतैः
कारन्धमिभिश्च शब्दनिष्णातैः ॥ १४ ॥

पौराणिकैस्सतन्त्रै-
श्छन्दोगैस्साप्ततन्तवैश्चापि ।
वेदान्तपारगैश्च
प्रथितैः पातञ्जलैश्चान्यैः ॥ १५ ॥

वादाहवेषु कुशलै-
रभियुक्तैः पण्डितैर्युक्तम् ।
शान्तं प्रसन्नवदनं
शिष्येभ्यस्सुगतजातकानि कथयन्तम् ॥ १६ ॥

तपसश्शरीरभूतं
कोशं पुण्यस्य धाम भव्यस्य ।
वारिधिमनुकम्पाया-
स्स दिवाकरमित्रमद्राक्षीत् ॥ १७ ॥

मनसा शिरसा वचसा
सादरमाराधनाम मस्करिणम् ।
सोऽप्यवलोक्य महीपं
सस्मितमाहूय भव्यमप्राक्षीत् ॥ १८ ॥

हर्षस्सहर्षचित्तः
स्तुत्वा तं पिण्डपातिनं नितराम् ।
तेन निरुद्धोऽप्यसकृ-
द्भूतल एवोपवेशनं चक्रे ॥ १९ ॥

हृष्टस्तदनु भदन्त-
स्तममुं हर्षं प्रशस्य पप्रच्छ ।
कस्मात्तनुरियमेवं
तान्ता राजन्ननीदृशी भवतः ॥ २० ॥

सविनयमुवाच भूप-
श्श्रावकधन्योहमद्य कृतकृत्यः ।
पात्रमभूवं यस्मा-
द्भवतः करुणाकटाक्षलहरीणाम् ॥ २१ ॥

नष्टनिखिलेष्टबन्धो-
रनुजैका मे बभूव हतशेषा ।
साऽपि वियोगाद्भर्तु-
र्भीता शत्रोः पलाय्य वनमेतत् ॥ २२ ॥

प्रविवेशेति विदित्वा
तामन्विष्यन्समागतः खिन्नः ।
भगवन्कदाचिदपि वा
श्रुतिपथमाप्ता तदीयवार्तेति ॥ २३ ॥

तरुच्छुत्वाथ विरागी
न वयं जानीम इत्यगदीत् ।
अत्रान्तरे तु खिन्नः
प्राञ्जलिरवदत्परस्समागत्य ॥ २४ ॥

स्वामिन्नद्भुतरूपा
कापि स्त्री विशति वह्निमतिखिन्ना ।
संरक्षतु तामचिरा-
दार्यः करुणांबुराशिरिति ॥ २५ ॥

दोदूयमानचेता
राजा तच्छ्रवणमात्रेण ।
बाष्पस्तंभितकंठो
जीवति का सेति पप्रच्छ ॥ २६ ॥

भिक्षुस्तदाचचक्षे
कल्येदूराद्यदृच्छया गच्छन् ।
वीणाक्वाणसमानं
रुदितं श्रुतवानहं करुणम् ॥ २७ ॥

तत्र च पलाय्य त्वरितं
रक्ताक्तां कण्टकालिभिस्स्यूताम् ।
परिजनरुद्धां दीनां
श्वसिते स्थूलां कृशामद्राक्षे ॥ २८ ॥

मनसा शून्यां धैर्या
च्चलितां वसतिं च दुःखानाम् ।
अधृतीनामाधारं
योषितमद्राक्षमद्भुताकाराम् ॥ २९ ॥

सा तु समीपगतं मां
प्रणतवती सादरं शिरसा ।
हन्ताऽहन्तु तदानी-
मुचितं नामन्त्रणं प्रापम् ॥ ३० ॥

अथ तत्स्त्रैणादबला
कापि समागत्य बाष्पदिग्धमुखी ।
भिक्षो बन्धुविहीनां
पाहि विशन्तीं नस्सखीमनलम् ॥ ३१ ॥

श्रुत्वा तादृग्वचनं
क्षणमिह तिष्ठेति चाख्याय ।
गुर्वादेशमवाप्तुं
त्वरितमितो देवमापमिति ॥ ३२ ॥

निखिलमुदन्तं श्रुत्वा
राजा भगिनीति तां विनिश्चित्य ।
शिष्यैर्युतेन तूर्णं
प्रययौ श्रमणेन तं देशम् ॥ ३३ ॥

तत्र मुमूर्षुजनानां
प्रसृतं वदनादतीव दीनतरम् ।
वृक्षलताभिर्गहने
विपिने शुश्राव रुदितनिस्वानम् ॥ ३४ ॥

सत्वरमुपसृत्य तदा
सिद्धामग्निप्रवेशाय ।
राज्यश्रियमवनीपः
पाणिभ्यां स्वां दधार सहजाताम् ॥ ३५ ॥

राज्यश्रीरपि मुग्धा
भ्रात्रा नीताऽनलादूरम् ।
क्रमशस्संज्ञां लेभे
तदनु चिराद्भूपमग्रजं मेने ॥ ३६ ॥

अन्योन्यं विलपन्तौ
तौ गुरुणा पिण्डपातिनाऽऽश्वस्तौ ।
स्नात्वा कथमपि भुक्ति
फलमूलैस्तत्र कृतवन्तौ ॥ ३७ ॥

वृत्तं तस्यास्सकलं
श्रुत्वा शोकाकुलं हर्षम् ।
आसीनं तरुमूले
पिण्डादी किमपि वक्तुमारेभे ॥ ३८ ॥

पत्नीयन्गुरुपत्नी-
मिन्दुर्हृत्वा पुरा प्रदुद्राव ।
सुचिरं विहृत्य च तया
पुनरपि तारां ददौ कवये ॥ ३९ ॥

अब्धौ कदाचिदिन्दुः
प्रतिबिम्बं स्वं विलोक्य मुखचन्द्रम् ।
स्मृत्वा भार्गवपत्न्याः
प्ररुदन्नश्रूण्यधो मुमुचे ॥ ४० ॥

तान्यखिलान्युदधिस्थाः
पतितन्याचम्य शुक्तयस्सर्वाः ।
मुक्ताश्चक्रुरनर्घा-
स्ताभिर्मालां चकार नागेशः ॥ ४१ ॥

मन्दाकिनीति सा स्व-
कप्रथिता सिद्धौषधिर्जाता ।
तामतियाति च काले
भिक्षुमुखात्सातवाहनो लेभे ॥ ४२ ॥

सा चास्माकं हस्तं
प्राप्ता कालेन दुरवापा ।
मालामेनामधुना
भवते दास्यामि गृह्यतां शुभदा ॥ ४३ ॥

इत्यभिधाय भदन्त-
श्रीवरवस्त्रान्तसंयतां मालाम् ।
अच्छाच्छामतिदीप्तां
भूपतये सादरं प्रददौ ॥ ४४ ॥

हर्षस्तदीयभासा
प्रतिहतनेत्रः कथंचिदादाय ।
सुचिरं विस्मयमानः
कण्ठे चक्रेथ तां मालाम् ॥ ४५ ॥

तदनु कदाचिद्देवी
राज्यश्रीः पतिविनाशदूनमनाः ।
काषायं परिधातुं
हर्षं सख्याऽर्थयामास ॥ ४६ ॥

भूपस्तदीयवचनं
श्रुत्वा तूष्णीं स्थितः खिन्नः ।
आचार्योऽथ बभाषे
सत्यं शोकोऽतिदुस्सहो भवति ॥ ४७ ॥

विदुषामपि धैर्यतरुं
समूलघातं निहन्त्येव ।
किमुत सुकुमारमनसा-
मबलानां बन्धुभिश्च हीनानाम् ॥ ४८ ॥

तन्नृपसोदरि नयने
निमील्यशोकः कथंचिदपि सह्यः ।
अश्वस्तन्यस्सकलाः
मर्त्यानां वृत्तयो लोके ॥ ४९ ॥

प्रव्रज्या तु श्लाघ्या
संसृतिविमुखस्य वीतरागस्य ।
देवि तथापि भ्रातु-
र्मतमनुगन्तुं तवाद्ययुक्तमिति ॥ ५० ॥

हर्षस्तदनु ललाप
स्वामिन्भवदुक्तमखिलमपि सत्यम् ।
किं तु ममेयं भगिनी
दीना बालाद्य नतदर्हा ॥ ५१ ॥

तादृशि कले प्राप्ते
प्रव्रज्या सापि सिद्धैव ।
इति पर्याकुलचेताः
तूष्णीं भावं समापेदे ॥ ५२ ॥

तेन च तथेति गुरुणा
प्रोक्तो हर्षस्सहर्षमभिकटकम् ।
स्वस्रा समं तदानीं
प्रत्यायातस्ततो विन्ध्यात् ॥ ५३ ॥

राज्यश्रीप्राप्तिकथां
तत्र जनानां पुनः पुनः कथयन् ।
राज्यश्रिया च युक्तः
प्रकृतीरशिषत्सुनीतिसंपन्नः ॥ ५४ ॥

नयनमहिगगनशरमित-
कलिवर्षे श्रीशपरितुष्ट्यै ।
वात्स्यायनेन कलितं
चरितं हर्षस्य हृद्यमार्याभिः ॥ ५५ ॥

इति श्रीवत्सकुलतिलकस्य तर्कव्याकृतितन्त्रसाहितीनिष्णातस्य
कविशिरोमणेः श्रीगीताचार्यस्य तनूजन्मनामहीशूर-
महाराजास्थानविदुषा अनन्तशयनमहाराजास्थान-
समधिगतसरलकविसूरिबिरुदेन रीवामहाराज-
महितेन केताण्डपत्र्यभिजनेन
राजगोपालचक्रवर्तिना कृते
पद्यहर्षचरिते
अष्टम उच्छ्वासः समाप्तः ॥

———*———

PK 3798 R246P33 1917
Rājagopāla Cakravarti, son of Gītācārya
Padyaharṣacaritam



PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY